तात्पर्यं व्युत्पत्तिलक्षणम्

१५२४

४० पत्रे

भाग्यविषयिताविवक्षणेन समूहालंबनजन्येऽतिप्रसंगः नवाव्याप्यतावच्छेदकानवगाहिपरामर्शजन्यानु-
मित्यसंग्रहः तथापि व्याप्तिपक्षधर्मत्वाप्रसिद्धिस्थलेऽव्याप्तिरेवैतत्तु कल्पोपेताबीजमित्यवधेयं नतु परस्परो-
पश्लेषेणोभयावगाहित्वविवक्षणान्न समूहालंबनेनजन्येतिप्रसंगः तच्चैकतरसंबंधविषयकत्वावच्छेदेना-
परावगाहित्वसंबंधः सामानाधिकरण्यं इत्यत आह मिथ इति परामर्शोव्यापकत्वादिति संबंधसंबंधा-
वगाहिता याविशिष्टैव प्रामाणिकतया व्याप्तिवैशिष्ट्याद्यप्रकारकपरामर्शस्य तत्सामानाधिकरण्यान-
वगाहित्वादिति भावः यद्यप्युभयसामानाधिकरण्यानवगाहितायाः परामर्शो व्यापकत्वस्य प्रागेवाभिहि-
तत्वादिदानीमुक्तशंकानावतरितुमर्हतीति तथापि पूर्वमुपाध्यायमते श्रांतानुमित्यव्याप्तेरेवनिर्भरस्य कृततत्वा-
त् संबंधावगाहित्वाभ्युपगमेन शंकासंभवो बोध्यः परामर्शो व्यापकत्वादित्युपलक्षणं उक्तार्थस्य लक्षण-
व्याकयादलाभोपि दोषो बोध्यः उभयविषयकत्वविशिष्टस्य निरूपकत्वेन जन्यतयानत्वतो विवक्षितनउ-
उभयविषयकत्वस्य जनकतावच्छेदककोटिप्रविष्टत्वलाभान्नात्रव्यवसायादावतिव्याप्तिरिति शंकते नचे-
तिनउभयविषयत्वेनविशिष्टज्ञानत्वेवावच्छेदकत्वपर्याप्तिनिवेशोऽसंभवः संशयान्यत्वादेराधिक्यस्यात्र-
मितिजनकतावच्छेदकजातिनिवेशादत्तस्तत्पर्याप्तिनिवेशसूचनाय घटितार्थकं निपातपदं एतेनोभयवि-
षयत्वनियतत्वपदितयाव्याप्यत्वेनतदा व्याप्तिवैशिष्ट्यविषयकत्वपक्षधर्मत्वविषयकत्वोभयाभाववद्वृत्तित्व-
रूपायां व्याप्तौ व्याप्तिवैशिष्ट्यविषयकत्वाभाववद्वृत्तित्वाघटकस्य उभयत्वावच्छिन्नाभावस्यानिवेशादनि-
मपक्षधर्मतांशवैयर्थ्यप्रदर्शनासंगतिः यदिच ज्ञानत्वस्य तदुभयाभाववद्वृत्तितयाविशेषणं नतु विशिष्टज्ञा-
नत्वरूपपरामर्शत्वेन तदभावोऽउच्येत इति स्वव्यापकतत्कत्वरूपव्याप्तेरेवनिवेशनीयत्वेउच्यते तेन तदाप्युभया-

गदा·

त्वावच्छिन्नविशेषणतयाव्यापकतत्तत्कत्वरूपव्याप्तिरेवनिवेशनीयेत्युच्यते तदाप्युभयत्वावच्छिन्नविशेषण॰
तयाव्यापकताप्रवेशेव्याप्तिवैशिष्ट्यविषयकत्वावच्छिन्नविशेषणतयातदप्रवेशाद्वैयर्थ्यंदुर्वारमेव एव
मुभयकत्वनियतकारणतानिवेशेनापि उपपत्तेः तन्नियतधर्मावच्छिन्नत्वनिवेशनमप्यफलंनियतत्वांशस्य
लक्षणवाक्यादनुपस्थित्यातद्घटितलक्षणालाभश्चेतिदूषणमपास्तम् तत्रव्याप्तित्वावच्छिन्नविषया॰
दिकारणतामादायपरामर्शानुव्यवसायादावतिव्याप्तिवारणायानेकवृत्तित्वविषयितात्वघटितधर्मावच्छिन्न
त्ववाकारणतायामार्थिकंनिवेशनित्यप्यनुपादेयमेव पक्षधर्मताविषयकत्वमात्रनियतधर्मावच्छिन्नकार
णताप्रवेशेसाधारणधर्मवज्ज्ञानजन्यतामादायसंशयेप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानजन्यता
मादायचधूमवान्पर्वतोनास्तीत्यभावप्रत्यक्षेविधेयविशेषणज्ञानादिजन्यतयाधूमवत्पर्वतवा॰
न्धूमवान्पर्वतोघटवानित्यादिविशिष्टवैशिष्ट्यबोधेचातिव्याप्तेर्व्याप्तिवैशिष्ट्यविषयकत्वोपादानमा
वश्यकमित्याशयेनपक्षधर्मतांशेवैयर्थ्यमाह पक्षेति· नचव्याप्तिवैशिष्ट्यविषयकत्वानियतधर्मा
वच्छिन्नकारणताप्रवेशेवह्निव्याप्योधूमोऽयंनवाइत्याकारकसंशयेव्याप्तिविषयकधर्मिज्ञानज
न्यताप्रवेशेवह्निव्याप्योधूमोऽयंनवाइत्याकारकसंशयेव्याप्तिविषयकधर्मिज्ञानजन्यतामादाया॰
तिप्रसंगइतिवाच्यम् पक्षधर्मतापदोपादानेपितद्दोषतादवस्थ्यात् तादृशधर्मिज्ञानादेरपिधर्मिवृत्ति॰
त्वावगाहित्वात्· नचस्वधर्मितावच्छेदकावच्छिन्नवृत्तित्वावगाहित्वानिवेशान्नदोषइतिवाच्यं तादृ
शसंशयधर्मितावच्छेदकावच्छिन्नकोटिद्वयसहचरितधर्मवत्ताज्ञानस्यतथात्वात्व्याप्तिविषयकत्वा
च्चतज्ज्ञानजन्यतामादायअतिप्रसंगस्यदुर्वारत्वात् नचतादृशदोषवारणायविशेषणांतरप्रक्षेपआव॰

प्रकारः तथा च व्याप्तिविशिष्टघटितलक्षणे व्याप्यविषयकत्वनिवेशेनैव पक्षधर्मताघटितलक्षणे
पि पक्षांशे पक्षधर्मतावगाहिज्ञानेजनकं तदंशे पक्षधर्मतानवगाहित्वस्य निवेशनेन प्रतीकारः संभ
वति साधारणधर्मादिमत्ताज्ञानजन्यसंशयेजनकज्ञानविषयीभूततायाः साध्यांशे पक्षधर्मता
याभानेबाधकाभावेन तादृशसंशयवारणसंभवात् इतिप्रकारान्तरोपादानवैयर्थ्यादित्यभिधानमेवोचि
तमिति वाच्यं एवमपि तादृशपक्षांशे स्वविषयधर्मिवृत्तिताज्ञानजन्यायोतत्रतदनवगाहिन्यामनुमिता
वतिव्याप्तेः ननु व्याप्तिविशिष्टघटितलक्षणेपि वह्निव्याप्तिर्दुर्वारैवेति चेन्न एतादृशातिव्याप्तेरुभय
पक्षेपि सत्त्वात्केवलपक्षधर्मताघटितलक्षणे धूमवत्पर्वतस्सदृशश्च महानसमिति ज्ञानजन्यानुमिता
वतिव्याप्तेर्दुर्वारत्वात् तदुपेक्षितः केचित्तु साधारणधर्मवत्ताज्ञानजन्यतामादाय संशयातिव्याप्तिवारणमे
ल॰ व पक्षधर्मताघटितलक्षणे पक्षादिबीजमित्याहुः एतन्मते व्याप्तिविशिष्टघटितलक्षणेपि वह्नितदभावोभ
यसहचरितधर्मव्याप्यधूमवान्पर्वत इति ज्ञानजन्यसंशयेऽतिव्याप्तिर्दुर्वारैवेति बोध्यं मिश्रास्तु घटत्वं ज्ञाना
न्तकर्मधारयपक्षमवलंब्य समाधानमुपक्रमन्ते व्याप्तिविशिष्टमिति व्याप्तिविशिष्टत्वपरिव्याप्याश्रयत्वेन तदनु
मितिजनकज्ञानस्य न तथात्वमपि तु लिंगस्यैवेत्यसंगतिः अत एव ह्याच एष व्याप्तिप्रकारकमिति व्याप्तिविशि
ष्टपदेन प्रकारितारूपवैशिष्ट्यस्य व्याप्ति पदेन बालक्षणया व्याप्तिप्रकारितायाविवक्षितत्वादिति भावः
न चैवं व्याप्तेः पक्षधर्मतावाधमजन्यानुमितावव्याप्तिपरिहारेपि धूमो वह्निव्याप्यो द्रव्यवान् पर्वतश्च
त्यादिज्ञानजन्येऽतिव्याप्तिप्रकारकत्वपक्षधर्मताविषयकत्वयोरवच्छेद्यावच्छेदभावविलक्षणत्वापत्तेः दोषः
विशिष्टे वैलक्षण्यरीत्याभासमानपदार्थयोः अवच्छेद्यावच्छेदकभावविरहात् पक्षधर्मताविषयताकत्वाव

गदा

2

च्छिन्नज्ञानत्वरूपो हेतुरूपे वा व्याप्तिप्रकारकत्वस्य विधेयत्वयानयोरवच्छेद्यावच्छेदकभावलाभो व्याप्त्यनिसिद्धए
वेतिचेत् एवमपि वह्निव्याप्यकालीनधर्मे वा नित्यादिज्ञानव्यावर्तनमशक्यं येन संबंधेन यस्य प्रकार
तातत्संबंधविषयकत्वेनैव तत्प्रकारकत्वस्यावच्छेद्यावच्छेदकभावे पक्षानुयोगिकसंबंधस्यानुमितिज
नकज्ञाने व्याप्यस्यैव संसर्गतया तद्विषयकत्वेन व्याप्यप्रकारकत्वस्यैवावच्छेदभावः स्यात् न तु व्याप्तिप्र-
कारकत्वस्येत्यसंभव एव एवं च न्यायानुयोगिक एव संबंधो व्याप्यस्य पक्षांशेभानतस्तादृशभ्रमजन्यानु
मितावव्याप्तिर्दुर्वारैव एतादृशभ्रमे वा स्वस्य पक्षानुयोगिकसंबंधस्य पक्षधर्मतापदार्थस्याभानात् पक्षा
षोहेतुतावच्छेदकसंबंधेन हेतुप्रकारकज्ञानं पर्यवसितं च पक्षधर्मताया ज्ञानमिति समासेनाशक्यप्रतिपाद-
नमिति न तस्य पक्षधर्मताज्ञानशब्दार्थता शब्दव्युत्पत्त्यनादरे च मूलं समासविशेषमाहृत्य व्याख्यपेति श्र-
त्राहुः पक्षे धर्मेतया हेतुतावच्छेदकसंबंधेन यज्ज्ञानमिति तृतीयासमासगर्भसप्तमीसमासादरात् पक्षवि-
शेष्यकत्वावच्छिन्नहेतुतावच्छेदकसंबंधावच्छिन्नप्रकारताकत्वविशिष्टज्ञानं पक्षधर्मताज्ञानपदार्थः
पक्षधर्मतयेत्यत्र तृतीयाया एवावच्छिन्नप्रकारतार्थकत्वात् एतद्विशिष्टज्ञाने व्याप्तिप्रकारकत्वान्व
ये च हेतुनिष्ठनिरुक्तप्रकारताकत्वावच्छिन्नव्याप्तिप्रकारकत्वज्ञानलाभः व्याप्तिहेत्वोः साक्षाद्विशेष्य-
विशेषणभावेन तद्विषयकत्वयोरनुमितिजनकपरामर्शेऽवच्छेद्यावच्छेदकभावोऽस्तु तत एवेति सर्वत्रानुमि-
तौ लक्षणसमन्वयः एवमपि व्याप्तेः पक्षप्रतिपाद्याविशिष्टांशे प्रसिद्धिस्थले व्याप्तिरित्यांशे कृते पर्यपी
ति वह्निव्याप्यधनवानित्याकारकज्ञानविषयसाध्याभाववद्वृत्तित्वाभाववद्रूपव्याप्तेरपि हेतुत्वेनारोप्रसि
द्धैवातो हेतुसमानाधिकरणेत्यादिव्याप्तेर्विशेषणाद्धेनान्नेदोषः अंशे व्याप्तेरिति विशेष्यविशेषणभावा- २

यत्र प्रकृतहेत्वादिसामानाधिकरण्यं तत्तन्नत्यदार्थस्तोमात्मकव्याप्तिपदार्थाप्रसिद्धेरित्यर्थः अखं-
डेत्यनेन व्याप्तिघटकहेत्वादिपदार्थानां खंडशः प्रसिद्धिमात्रमिति स्वचितं तावतैव समाधानमप्रत्यस्त्य
ते इत्यपि अत्र व्याप्त्यप्रसिद्धिः साध्यतावच्छेदके स्वविशेषणहेतुसमानाधिकरण्याभावप्रतियोगितानव-
च्छेदकत्वकात्वासत्वेन अत्र हेतुव्यापकतावच्छेदकत्वस्य इंधनत्वादौ वह्नित्वावच्छिन्नसामानाधिकर-
ण्यस्य प्रकृतहेतावपि प्रसिद्ध्या व्याप्तिविशिष्टेत्यनेन साध्यतावच्छेदके प्रकृतहेतुव्यापकतावच्छेदकत्वा-
वगाहित्वे सति प्रकृतहेतौ तादृशसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यावगाहित्वविवक्षणेन दो-
ष इत्यतो व्यापकत्वादिघटकपदार्थानामपि खंडशो निवेशाय अथत्रिसाध्यकहेतुस्थले अव्याप्तिं शंकते भ्रमा-
नुमितेरिति भ्रमस्य पूर्ववत्फलत्वसंभवात् फलत्वे चेति भावः साध्यकानुमितौ साध्यस्यानियमतो विशेष-
णतया इदमाकारकवदित्याकारिकैवानुमितिबोध्या प्रतिज्ञाजन्यबोधस्यानुमितिसमानाधिकरण्ययोः
खंडशउपादानेपि तथा अव्याप्तिः हेत्वधिकरणसाध्याधिकरणयोरप्रसिद्ध्या हेतुव्यापकत्वसामानाधिक-
रण्ययोरपि खंडयोरप्रसिद्धिरिति भावः इदमुपलक्षणं भ्रमानुमितेरलक्ष्यत्वेपि वास्तवव्यापकत्वाद्यवगा-
हित्वनिवेशे धूमवत्त्वादिना पदार्थान्तरावगाहि धूमव्यापकवह्निसमानाधिकरणधूमवानयमित्यादि-
ज्ञानजन्यायां प्रमानुमितावव्याप्तिः धूमाधिकरणाद्यनवगाहनेन तादृशज्ञानस्य वास्तवधूमाधिकरणा-
दिघटितव्यापकत्वाद्यनवगाहित्वात् इति तत्र न यं कं तादृशभ्रमजन्यानुमितावपि प्रमात्मकस्य वह्निव्याप्य-
धूमवान्पर्वत इत्याकारकवास्तवव्यापकत्वाद्यवगाहिपरामर्शस्य स्वरूपयोग्यतया फललक्षणगमनसंभवा-
त् इदं च जात्यघटितलक्षणाभिप्रायेण जातिघटितनिष्कृष्टलक्षणस्य प्रमानुपपरामर्शजन्यानुमिति

गदा० 3

इतिजातिमादायसर्वत्रलक्षणसमन्वयसंभवात् नचपरामर्शानुव्यवसायादावतिव्याप्तिवारणायव्या-
प्तिप्रकारकपक्षधर्मताज्ञाननिष्ठविषयितावच्छिन्नजनकतानिरूपितजन्यतायाविवक्षणीयतयातद्धादिलिंग-
कपरामर्शस्यापिउक्तभ्रमसाधारण्यायव्याप्त्यादिघटकतावत्पदार्थानांपरस्परोपश्लेषावगाहिविषयि-
त्वेनैवजनकत्वस्योपगंतव्यात् नवास्तवव्याप्त्याद्यवगाहित्वाघटितलक्षणसमन्वयः क्वापीतिवाच्यंस-
र्वत्रविषयेभ्रमस्यभ्रमजन्यानुमितेश्चाप्रामाण्यकतयायावत्साध्यलिंगयत्सकपरामर्शोऽनुमितिजन-
कपरामर्शोवाप्रमारूपस्तावत्साध्यपक्षलिंगकानुमितौलाघवेनव्याप्तिघटकतावत्पदार्थानांवैशिष्ट्यो-
ऽनिवेशविशिष्टव्याप्त्यादेरेवविषयितयानुमितिजनकतावच्छेदकत्वोपगमात् तादृशजनकताघ-
टितजातिघटितलक्षणस्यव्याप्तिपदार्थघटितस्यनिष्प्रत्यूहत्वात् नचप्रमेयत्वकेवलसामानाधिक-
रण्यत्वादिनाव्याप्त्याद्यवगाहिज्ञानवारणायतादृशानुमितिजनकतायामपिहेत्वादिपदार्थानांपरस्प-
रोपश्लेषावगाहित्वमेवावच्छेदकतापर्याप्त्यधिकरणंहेत्वादिसामानाधिकरण्यांतपदार्थस्तोमघ-
टितविशिष्टपदार्थप्रतियोगिकसंबंधत्वविरहेणविषयितासंबंधेनतादृशविशिष्टविषयस्यप्रमेयत्वादि-
नाव्याप्त्याद्यवगाहिज्ञानव्यावर्तकतयाततोऽनुमित्यप्रसंगात् स्वरूपतोयेषांव्याप्तिघटकतारूपंतेषां-
णांतत्त्वगाहितातावत्पदार्थस्तोमात्मकव्याप्तिज्ञानवारणायस्वरूपतः तावत्पदार्थप्रकारकत्वनिवे-
शनस्यावश्यकत्वेतेनविशिष्टव्याप्तिनिवेशासंभवइत्यपिनवाच्यंविशेषणानवच्छिन्नतत्तत्पदार्थघ-
टितविशिष्टानिरूपितविलक्षणविषयितायाएवविषयितात्वेनजनकतावच्छेदकतापर्याप्त्यधिकरण-
तादृशविशिष्टविषयसंबंधनयातादृशविशेषविषयेणोक्तज्ञानव्यावृत्तेः अतएवदीधितिकारोपिपरामर्श-

ग्रंथेऽन्यथा व्याप्त्यनभ्युपगंतृमते व्यापकतावच्छेदकपदार्थानां खंडशः परस्परोपश्लेषावगाहित्वमनिवे
शनापि विशिष्टविषयकसंस्कारेण व्यापकताज्ञानहेतुतासंभवतीति ग्रहवृत्तिहेतुत्वविरोधेन व्यापकत्वस्यापि ।
खंडशो निरुक्तिः तेषां परमतिरिच्यत इत्यनेन नदर्शयिष्यति विशिष्टविषयस्य प्रमामात्रनिष्ठजनकताव
च्छेदकत्वाभिप्रायेणैव च व्याप्यादिप्रकारकत्वमनभिदधानो वह्निव्याप्यधूमवान् पर्वत इति निश्चयत्वावच्छि
न्नकारणतेत्यादिना जातिघटितलक्षणमभिधास्यते तत्र वह्न्यादिपदं दर्शितसाध्यविशेषपरमित्यलंप
ल्लवितेन तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमिति साधनाधिकरणादिपदार्थानाम ।
धिकरणाधेयत्वादिपदार्थांशे तत्तत्संबंधावगाहित्वमित्यर्थः तत्तदंशे तेन संबंधेन तत्तत्प्रकारकत्वमि ।
ति यावत् तेनात्मादीनां समवायादिसंबंधाप्रसिद्धावपि नोक्तभ्रमात्रमित्यसंग्रहः हेत्वादिप्रकारतापि हे
तुतावच्छेदकावच्छिन्नत्वेनैव निवेश्या अतो धूमत्वादिना धूलीपटलादिभ्रमसंग्रहः यद्यप्येवमप्यधि
करणं धूमवत्वृत्तिरोधिकरणीयेत्यादिस्थलरीत्या तावत्पदार्थराशिमवगाहमानाधीने व्याव ।
र्त्यं तथापि धूमादिप्रकारतानिरूपितविशेष्यतावच्छिन्नाया अधिकरणप्रकारतानिरूपितविशेष्य
तावच्छिन्नाया वृत्तिप्रकारता इत्यादिरीत्या साध्याधिकरणवृत्तित्वप्रकारतापर्यंतनिवेशान्न व्याहृ ।
तिः उक्तसमूहालंबनतो विशिष्टप्रकारकधियो वैलक्षण्याय तत्तदंतराभासमानाधिकरणादिपदा
र्थविशेषणनिरूपितविशेष्यताविशेष्यांतरनिरूपितप्रकारत्वयोरवच्छेद्यावच्छेदकभावोपगमात्
एकविशेष्यतापन्नस्य तत्रापरांशे प्रकारतानवच्छिन्नविशिष्टप्रकारताविशेष्यत्वयोरभेद एवं तथा च धू
मादिप्रकारतानिरूपिताया अधिकरणप्रकारतानिरूपितायावृत्तित्वप्रकारताया एकगत्येव निवे

गदा॰ प्तिः एवं च पञ्चकपदार्थो निष्ठावच्छेद्यावच्छेदकभावापन्नविषयताद्वयनिवेशे पञ्चापि व्यापकविषयतानां नि

५ वेशप्रकारणतावच्छेदकानिर्वचनेन लाघवमित्यपि वदंतीति तच्चिंत्यं तथा सति वह्न्यादेर्वत्प्रकारकवानय

मित्यादिज्ञानानां प्रकारकादिप्रकारतानिरूपितदंडादिविशेष्यताकत्वेन प्रकारकाभाववान् दंड इत्यादिनि

श्चयप्रतिबंधताप्रसंगात् तत्र गत्यंतरानुसरणे गौरवादिति मूलस्य व्याप्तिपदमपि लक्षणपरं निरुक्त

प्रकारताविशेषपरं निरूपकत्वमेव च तद्विशिष्यमतो नो प्रदर्शितस्थले व्याप्तिपदार्थघटितलक्षण

संगतिः अथवा इत आरभ्य यथाश्रुतपाठार्थपरित्यागकारणोक्तिः विवक्षणीयस्य व्याप्तिप्रकारकप

क्षधर्मतानिश्चयत्वावच्छिन्नजनकताकत्वस्य मूलस्य पाठानुपपत्त्या लभ्यतया तत्परित्यागस्यात्रैवावश्य

कत्वात् न च ज्ञानपदस्य लक्षणया निश्चयत्वावच्छिन्नरूपविशेषपरतया निश्चयत्वावच्छिन्नलाभः

निश्चयत्वेन ज्ञानलाभेऽपि निश्चयतावच्छिन्नजनकतायास्त्वलाभात् पदविशिष्टवैशिष्ट्यविवक्षया

हृदानिश्चयत्वविशिष्टनिरूपितजन्यतालाभेन सामंजस्यमिति चेत्तथापि ज्ञानविशेषणतया व्या ५

प्तिप्रकारकत्वादीनामेव लाघवेन जनकतावच्छेदकत्वाद् भेदसंबंधेन व्याप्तिप्रकारकादेव च ज्ञानविशे

षणतया मूलोक्तजात्यनुक्तो लाभेन विवक्षणीयालाभादिति जात्यघटितपक्षयाश्रुतलक्षणव्यतिरेकिलिंग

कानुमितावव्याप्तिर्द्योतितेन च इत्यादिना अव्याप्तिरिति किरणावलीचिंतामणिकारमते व्यतिरेकयोर्व्यापक

पकाभावस्यैव गमकतया तत्र व्याप्तिप्रकारेण हेतुमत्ताज्ञानस्यानुमितावजनकत्वादिति भावः साध्याभा

वव्यापकाभावप्रतियोगित्वप्रकारकहेतुमत्ताज्ञानस्याविवक्षणे चान्वयिन्यव्याप्तिरिष्टैवा व्यभिचार

धीति साध्याभाववद्वृत्तित्वधीप्रतिबंधकतावच्छेदकविषयतात्वेन धूमव्यापकवह्निसमानाधिकरण

रूपनिधूमत्ववन्न्याभावव्यापकतावच्छेद्यानुयोगितानिरूपितप्रतियोगितावच्छेदकधूमत्वविषय-
त्वेऽप्यनुगमय्यत्ताद्रूपविषयताशालिपक्षधर्मताज्ञानस्यैवनिवेशनीयत्वादित्यर्थः यथाश्रुतविषया
नुगमोनादरणीयः प्रमासंग्रहात्प्रपातेरणाव्याप्तिविषयकज्ञानजन्यप्रतिप्रसंगाच्च प्रतिबंधकताव-
च्छेदकविषयताशालिज्ञानस्यताद्रूपविषयताद्वैविषयकत्वेन निवेशस्यापिदोषत्वेनैनतास्मिकास्पर्शि
त्वल्पत्वात् व्याप्यवच्छिन्नहेतुविषयतैवव्याभिचारप्रतिबंधकतावच्छेदकत्वेनानिवेशनीयातत्प्र-
तिबंधकत्वेनपक्षधर्मताज्ञानेभवतुकथंनिवेश्यतइतिचेन्नतथासतिवह्निव्याप्यो धूमो धूमोऽव्यवान्
पर्वतइत्यादिज्ञानाव्यावृत्तेः प्रतिबंधकतावच्छेदकविषयतानिरूपितविशेष्यतावच्छिन्नायाहेतुवि
षयतातन्निरूपितपक्षविषयताशालित्वेन प्रतिबंधकतावच्छेदकहेतुविषयतावच्छिन्नतत्प्रकार-
तानिरूपितपक्षविषयताशालित्वेनवाज्ञाननिवेशस्यावश्यकत्वात् अत्रव्यापकताज्ञानस्यकथं-
चित्व्यभिचारधीविरोधित्वेपिसाध्याभावव्यापकाभावप्रतियोगित्वज्ञानस्यतद्विरोधित्वेमानाभावः
ग्राह्याभावाद्यनवगाहित्वात् हेत्वभावप्रतियोगिकाभावत्वेहेतौसाध्याभावसामानाधिकरण्यावगा
हिनोहेत्वभावेसाध्याभावसमानाधिकरणाभावप्रतियोगित्वमवगाहमानाधियंप्रतिहेत्वभावे-
साध्याभावसमानाधिकरणाभावाप्रतियोगित्वरूपसाध्याभावव्यापकत्वज्ञानस्यविरोधित्वेपि-
हेतुतावच्छेदकरूपेणहेतौसाध्याभावसामानाधिकरण्याधिपप्रतितस्याःतथात्वात् हेत्वभावाभा
वत्वेनहेतुधर्मिकव्यभिचारधीनिवेशेचहेतुव्यापकसाध्यसामानाधिकरण्यज्ञानासंग्रहःहेत्वभावा
५ भावत्वेनहेतुविषयकतत्तत् समानाधिकरणाभावप्रतियोगित्वग्रहेतेनैवतद्विषयकतत्सामानाधिक-

गदा. रण्याभावाप्रतियोगित्वज्ञानस्य प्रतिबंधकत्वादित्याशंक्य मणिमंत्रन्यायेन पक्षविधव्यभिचारधियं प्रति उ-
5 भवज्ञानस्य प्रतिबंधकत्वमवश्यापकं तत्सत्त्वे फलाऽनुत्पादनियममाह भवति हीति तादृशभ्रमे धूमव्याप-
कवह्निसामानाधिकरण्यग्रहेऽपि वह्निव्यभिचारग्रहात्तद्वह्निसमानाधिकरणधूमत्वग्रहाद्धावनेवह्नि-
व्यभिचारधीविरोधः तद्ग्रहसमानधर्मिकव्यभिचारज्ञानात्त्वित्याहुः नन्वत्र प्रतिबंधकतावच्छेदकत्वं
न स्वरूपसंबंधविशेषः व्यापकसामानाधिकरण्यघटकसामानाधिकरण्यांशस्य व्यभिचाराविघट-
कतया व्यापकत्वविषयकत्वस्यैव तद्विषयो व्यभिचारधीविरोधिता बीजत्वात् सामानाधिकरण्यविष-
यतायाः प्रतिबंधकतावच्छेदकत्वे नेतरभावेन प्रतिबंधकतानवच्छेदकतया धूमव्यापकत्वविषयता-
याः तदवच्छिन्नविषयतायावाउपादेयतया तादृशविषयतया च समं पक्षविशेषणतापन्नहेतुविषयत्वा-
देर्निरूप्यनिरूपकभावविरहेण दर्शितरूपेण परामर्शानिवेशासंभवात् अतोत्र यादृशविषयताकनिश्च- ५
यत्वव्यापकं प्रतिबंधकत्वं तादृशत्वमेव प्रतिबंधकतावच्छेदकत्वं वाच्यं तथा च धूमव्यापकवह्निसामाना-
धिकरण्यादिविषयकनिश्चयत्वस्यापि धूमधर्मिकवह्निव्यभिचारधीप्रतिबंधकताव्याप्यतया तद्विषयता-
याअपि तथात्वमत नमेवेति वह्निव्याप्यधूमसमानाधिकरणासंभवान् इति ज्ञानजन्येऽतिप्रसंगः नच प-
क्षविशेषणतयाभासमानो यादृशो धर्मः तादृशधर्मिकव्यभिचारज्ञानमेव विवक्षितमतो नायं दोष इति वा-
च्यं तादृशपरामर्शासंभवान् धूमवान् पक्ष इत्यादिसमूहालंबनस्य तावतापि वारणात् इत्याशंक्य पक्षविशेषणताप-
न्नहेतौ यादृशविषयता प्रतिबंधकतावच्छेदिका प्रतिबंधकतावच्छेदकविषयतानिरूपिता वा स्वावच्छेदकाव-
च्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबंधकतावच्छेदकत्वेन प्रतिबंधकतावच्छेदकविषयतानिरूपितत्वेन वा-

सेवनिवेशप्रयोजनस्य प्रायेण समाधेन्नेतथाविधधर्मेति वह्निव्याप्यधूमसामानाधिकरण्याद्यवच्छिन्नरासभा
दिविषयत्वेन तत्त्वथेति त्वावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबंधकत्वादिमदित्यर्थः एवमपि धू
मव्यापकवह्निसमानाधिकरणरासभसमानाधिकरणधूमवानयमित्यादिज्ञानाव्याप्तिरनुग्राहकव्यतिरे
कोति एतेन तु वह्नित्वाद्यवच्छिन्नधर्मिकधूमत्वाद्यवच्छिन्नव्यापकताग्रहत्वेनैव धूमो वह्निव्यभिचारीत्या
दिव्यभिचारज्ञानप्रतिबंधकतालाघवात् आवश्यकत्वाच्च न तु धूमव्यापकवह्निसमानाधिकरणवह्निधू
मत्वादिरूपव्याप्तिज्ञानत्वेन गौरवात् मानाभावाच्च तथा च तादृशव्याप्तिज्ञानविषयतानव्यभिचारग्रह
प्रतिबंधकतावच्छेदिका अभेदत्वाद्यवच्छिन्नेतादृशधूमत्वादिरूपव्याप्तिग्रहे तदवच्छिन्नेव्यभिचारज्ञानानु
दयात्समानधर्मिकव्यभिचारज्ञाने प्रति तादृशव्याप्तिज्ञानत्वेनापि मणिमंत्रादिवत् पृथक्प्रतिबंधकता
वच्छेदकत्वमस्त्वेवेति न च धर्मितावच्छेदकतानिरूपकविशेष्यतानिरूपकविरोधिप्रकारताया एव
प्रतिबंधकतावच्छेदकतया धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववज्ज्ञानं पर्वत इत्याकारकतादृश
धूमत्वात्मकव्याप्यंशे निर्धर्मितावच्छेदकज्ञानीयतादृशव्याप्तिप्रकारताया व्यभिचारधीप्रतिबंधकत्वाव
च्छेदकत्वासंभवान्नादृशपरामर्शासंग्रहः प्रतिबंधकतावच्छेदकीभूतप्रकारतावच्छेदकतापर्याप्त्यधिक
रणधर्मावच्छेद्यप्रकारताशालिपरत्वधर्मताज्ञाननिवेशे धूमत्वादिनापदार्थानवगाहिपरामर्शा
संग्रहः तादृशप्रकारतावच्छेदकतापर्याप्त्यधिकरणावास्तवधूमादिघटितव्याप्तित्वस्य तादृशाश्रमप्रकार
तानवच्छेदकत्वादिति वाच्यं धर्मिविशेष्यतानिष्ठव्यभिचारधीप्रतिबंधकतावच्छेदकतायां निरूपितत्वसं
बंधेन यत्प्रकारताया अवच्छेदकत्वे तदवच्छेदकतापर्याप्त्यधिककरणरूपाश्रयीभूतप्रकारताशालि

गदा.

6

त्वेन सकलपरामर्शसंग्रहसंभवात् इति चेन्नहि वह्निव्याप्यधूमसामानाधिकरण्यादिविषयत्वेन किमपर
राद्धं दर्शितव्याप्तिवन्नघटितधर्मान्तराणामपि व्यापकताघटितत्वाविशेषात् किमपराद्धं वा धूमत्वाद्यस
हितेन धूमव्यापकवह्निसामानाधिकरण्यादिना तद्विषयतयापि व्यभिचारधीप्रतिबंधकत्वोपगमे व
ह्निव्याप्यधूमसमानाधिकरणरासभवानयं धूमव्यापकवह्निसमानाधिकरणरासभवानयमित्यादिज्ञा
नजन्येऽतिप्रसंगः इत्याशंक्य मणिमिश्रादिन्यायेन प्रतिबंधकत्वकल्पनमस्यानुभवानुरोधेनैव धूमव्यापकव
ह्निसमानाधिकरणधूमत्वादिरूपव्याप्यत्वग्रहे तद्धर्मितावच्छेदकावच्छिन्नव्यभिचारधीनोत्पद्यत इति नि
र्विवादानुभवात्तद्ग्रहस्य समानधर्मितावच्छेदकव्यभिचारधीप्रतिबंधकत्वमावश्यकं वह्निव्याप्यधूमस
मानाधिकरणो रासभ इत्यादिज्ञानदशायां च रासभादौ व्यभिचारग्रहस्यैवानुभवात् न तथाविधधूमसा
मानाधिकरण्यज्ञानत्वेनापि प्रतिबंधकत्वान्तरमिति विशेषमाह भवति हीत्यादिना रासभादौ तद्ग्रहेऽपि
व्यभिचारग्रहादित्यंतेन नन्वधूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिग्रहविषये यदि व्यभिचा
रज्ञानानुत्पादोऽनुभवसिद्धः तदा वह्निर्धूमव्यापक इत्यादिज्ञानकालीनकेवलधूमत्वादिग्रहविषये तद
नुत्पादस्तथा सामानाधिकरण्यांशस्याकिंचित्करत्वादिति साध्ये धूमाव्यापकतानाग्रहकालीनधूमत्वादि
ग्रहत्वेनैव प्रतिबंधकत्वमुचितं वस्तुतो वह्न्यादौ धूमत्वाद्यवच्छिन्नव्यापकताग्रहदशायां धूमत्वाद्यवच्छेद
नवह्न्यव्यभिचारस्यापि ग्रहः तथा धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषयेऽवच्छेदकधर्मे तद
नुरूपप्रतिबंधकस्वरूपादेव न व्यभिचारग्रह इति न तान्नतादृशधूमत्वादिग्रहविषयतया व्यभिचारग्रहप्रति
बंधकतावच्छेदकत्वमिति नोक्तानुगमः साधीयानतएवाह व्यतिरेकसहचारेणेति व्याचक्रुः व्यतिरेकसह

६

चारेणान्वयसहचारग्रहनिरपेक्षव्यतिरेकसहचारग्रहेणापि अन्वयव्याप्तिर्गृह्यत इत्याचार्यमताश्र
यणादित्यर्थः तथा च व्यतिरेकिणापि अन्वयव्याप्तेरवगमकतया अनुगमासंभवेऽपि नाव्याप्तिरिति भा
वः पक्षे तन्मतेन विचारसहमित्युपेक्ष्यमाणाकृता व्यतिरेकव्याप्तेरनुमित्यौपयिकत्वमवश्यमपि तेन तथापि
जातिघटितलक्षणादरेणानुगमनिबंधनाव्याप्तेः परिहरणीयतया आपाततः तन्मतावलंबनेन समाहि
तं नन्वविपरीतभ्रमानंतरं ग्राह्यसंशयानंतरं च विना ग्राह्यव्याप्यवत्ताज्ञानं धूमवत्त्वादिनिश्चयो नोत्पद्यते
सति तस्मिन्न जायतेऽतो ऽन्वयव्यतिरेकाभ्यां विपरीतज्ञानानंतरप्रत्यक्षनिश्चयत्वावच्छिन्नं प्रत्यपि
ग्राह्याव्याप्यवज्ज्ञाननिश्चयत्वेन हेतुताकल्पनेन च ग्राह्याभावज्ञानेन प्रतिबंधादेव विपरीतभ्रमानंतरं प्रत्य
क्षनिश्चयानुत्पत्तिनिर्वाहे किं विशेषदर्शनस्य हेतुतयेति वाच्यं विपरीतधर्मादिसति विशेषदर्शने प्रत्यक्ष
निश्चयोत्पत्त्या प्रत्यक्षनिश्चये ग्राह्याभावग्रहस्याप्रतिबंधकत्वात् विपरीतनिश्चयकालेऽनुमित्यादेर्वा
रणाय विपरीतनिश्चयस्य विशिष्टधीविरोधित्वकल्पनायाश्चावश्यकत्वेऽपि प्रत्यक्षनिश्चयान्यत्वस्य तत्प्र
तिबन्धतावच्छेदकत्वोपगमात् नच प्रत्यक्षनिश्चयं प्रति विपरीतज्ञानस्याप्रतिबंधकत्वे पीतः शंखो न श्वेत इत्याका
रकापि ज्ञाते दोषविशेषजन्यविपरीतनिश्चयकाले स्वैत्यव्याप्यशंखत्वादिदर्शनात् शंखः श्वेत इत्यादिबा
धापत्तेः ताहृशदोषस्यैव श्वेतत्वादिग्रहप्रतिबंधकत्वात् यदि च विनष्टेऽपि दोषे ताहृशाविपरीतनिश्च
यसत्त्वेन श्वेतत्वादिग्रहप्रतिबंधकत्वात् यदि च विनष्टेऽपि दोषे ताहृशाविपरीतनिश्चयसत्त्वेन श्वेतत्वादिप्रत्य
क्षे तदानीं प्रत्यक्षे समानेन्द्रियजन्यदोषविशेषाजन्योपनीतभानभिन्नविपरीतनिश्चयस्य प्रतिबंधकत्वे प
वं शंखः श्वेत इति चाक्षुषनिश्चयोत्पत्तौ सत्यां पत्रदोषसमवधानं तत्र ताहृशातिनिश्चयसत्त्वे यदि दोषात् शंखो न

गदा. श्वेत इति चाक्षुषनिश्चय स्तदा तन्निर्वाहोऽपि समानेन्द्रियजन्यविपरीतनिश्चयस्य प्रतिबन्धकत्वादेव अतएव
1 साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीत्यनेन मणिकृतां दोषजन्यभ्रमे समानेन्द्रियजन्य
लौकिकयाग्राह्याभावज्ञानस्य विरोधिता नान्यविपरीतज्ञानस्येत्यभिधानं सङ्गच्छते चक्षुषा वंशोरगत्वभ्रमे
पि त्वचत तदभावग्रहात् समानेन्द्रियजन्यत्वनिवेशने शंखो न श्वेत इत्यादिनिश्चयानन्तरं सति विशेषदर्शने
ने चाक्षुषसामग्रीविगमे शंखः श्वेत इत्यादिमानसज्ञानमिष्यत एव विशेषदर्शनेन तन्निश्चयनाशो विशे
षदर्शनेन प्रतिबन्धात् तादृशनिश्चयान्तरस्य चानुत्पत्त्या तादृशमानसोत्पादस्यावश्यकत्वात् तत्पूर्वं दा
णो न इत्यादोपगमे अनुभवविरोधविरहात् अस्तु वा तादृशमानसादिसाधारणं लौकिकनिश्चयान्यज्ञानत्व
मेवानुमित्यादिसाधारणविपरीतनिश्चयप्रतिबध्यतावच्छेदकं यत्र सत्यपि चक्षुरादेः सन्निकर्षे कराद्यदर्शन
सहितदूरत्वादिदोषादयं स्थाणुर्वेत्यादिभ्रमः तत्र करादिदर्शनेनायं स्थाणुर्वेत्यादिलौकिकनिश्चयस्तत्र
व भ्रमोत्तरप्रत्यक्षे विशेषदर्शनहेतुता अथ तत्र भ्रमोत्पत्तिक्षणे न कथं तादृशालौकिकज्ञानं विपरीतज्ञानो
त्तरप्रत्यक्ष एव विशेषदर्शनहेतुतया तदुत्पत्तिक्षणे प्रत्यक्षोत्पत्तौ विशेषदर्शनविरहेणोद्वीरत्वात् यदि च दू
रत्वादिदोषेण प्रतिबन्धान्न तदा न तदा तदुत्पादापत्तिरिति तदा भ्रमोत्तरं विशेषदर्शनात् कथं तदुत्पत्तिस्तदापि
तद्दोषसत्त्वादिति चेन्न विशेषादर्शनसहितस्यैव दूरत्वादेः प्रतिबन्धकत्वेनोभयोपपत्तेः अस्तु वा तादृशदोषस
मवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनस्य हेतुत्वं न तु विपरीतज्ञानवत्तादृशदोषाणां चाप्रतिबन्धकत्वमि
ति मते प्रत्यक्षविशेषे इति व्याप्तिमाशङ्क्य निराकरोति नवेत्यादिना भ्रमो विपरीतनिश्चयः एतच्च मतं मिश्रा
णामेवानुमतं न तूपाध्यायानां तैर्विशेषदर्शनाभावविशिष्टसंशयसाधारणविपरीतज्ञानप्रतिबन्धकताया

पगम्य संशयापत्तेः प्रत्यक्षनिश्चयवारणात् न च विशेषदर्शनाभावविशिष्टग्राह्याभावज्ञानत्वेन विशिष्टबु
द्धिप्रतिबंधकत्वे बाधनिश्चयकाले लिंगपरामर्शरूपविशेषदर्शनादनुमित्यापत्तिः विशिष्टाभावसत्वात् ए
वं निश्चयत्वानिवेशात् संशयोत्तरं संशयानुत्पत्तिः योग्यतासंशयस्य शाब्दबोधप्रतिबंधकतापत्तिश्च प्रतिब
ध्यतावच्छेदके निश्चयत्वप्रवेशेन संशयोत्तरं संशयोपपादने बाधनिश्चयोत्तरमपि संशयापत्तिरिति वाच्यं परो
क्षज्ञाने बाधनिश्चयस्य प्रतिबंधकत्वांतरकल्पनेन बाधनिश्चयदशायामनुमित्याद्यापत्तिवारणात् प्रत्य
क्षनिश्चयत्वस्यैव संशयसाधारणविपरीतज्ञानप्रतिबध्यतावच्छेदकतया ग्राह्यसंशयोत्तरं संशयशाब्द
बोधाद्युपपत्तेः नचैवं बाधनिश्चयोत्तरं संशयोपपत्तेः अनुमित्यादिसाधारणबाधनिश्चयप्रतिबध्यतावच्छेद
कगर्भप्रत्यक्षनिश्चयान्यत्वस्य प्रवेशनीयतया संशयस्य निश्चयप्रतिबध्यत्वोपपत्तेः नच प्रत्यक्षनिश्चयान्यबु
द्धौ विपरीतनिश्चयत्वेन प्रतिबंधकत्वांतरस्यैतन्मतेप्यावश्यकत्वे प्रत्यक्षनिश्चये विशेषदर्शनाभावविशि
ष्टविपरीतज्ञानाभावहेतुताकल्पनापेक्षया विशेषदर्शनस्य लाघवोहेतुत्वकल्पनमेवोचितमिति वाच्यं
व्याप्तेः संबंधादिभेदेन भिन्नतया व्याप्यदर्शनस्याननुगमेन व्यभिचाराद्धेतुताकल्पनासंभवात् नानाविधवि
शेषदर्शनाभावकूटविशिष्टविपरीतज्ञानाभावस्य चाननुगतत्वाच्च अन्यथा अत्रैवान्यत्रापि उत्तेजकहेतुतान्या
तिप्रसंगवारणासंभवेन सर्वत्रोत्तेजकविलयप्रसंगात् एवं सत्यपि विशेषदर्शने विपरीतज्ञानासत्वे इव विपरी
तज्ञानसत्वेपि सामान्यसामग्रीबलात् प्रत्यक्षसामान्यापत्तिर्दुर्वारैवेति विपरीतज्ञानानन्तरं प्रत्यक्षे संशयसाधा
रणविपरीतज्ञानाभावस्य विशेषसामग्रीत्वमावश्यकमिति गौरवं नच नानाविधविशेषदर्शनाभावानां विप
रीतधीप्रतिबंधकतावच्छेदकगर्भनिवेशपकाभावविशिष्टत्वेनैवापराभावस्य निवेशनीयतया तावदभावा

गदा०

नांविशेष्यविशेषणभावेपरस्परंस्वप्रामाण्यग्रहाभावादिभिश्च समंविनिगमनाविरहेणावाबाऽकल्पमितिना-
हृशविशेषदर्शनानंतरप्रत्यक्षेतादृशविशेषदर्शनानांविपरीतज्ञानाजन्यप्रत्यक्षेतदभावस्यपृथक्कारणत्वंकल्प्य-
मितिवाच्यं आनंतर्यस्यस्वतघटितत्वेनकार्यकारणभावस्यतत्तद्व्यक्तिविश्रामापत्तेः यदिचनानाविधविशेषदर्श-
नानांविपरीतज्ञानेविरोधित्वेनानुगमान्नैकविधविशेषदर्शनस्यान्यविधविशेषदर्शनजन्यप्रत्यक्षेव्यभिचार
इतिनतज्जन्यतावच्छेदककोटावानंतर्यनिवेशनं प्रसक्तत्वावच्छेदकधर्मदर्शनस्यापिसंग्रहइष्यतेतदापि-
विपरीतज्ञानाजन्यप्रत्यक्षेविशेषदर्शनस्यव्यभिचारवारणायविपरीतज्ञानाव्यवहितोत्तरत्वस्यविशेषदर्शनज-
न्यतावच्छेदकत्वेऽप्यवश्यंनिवेशनीयतयाविशेषदर्शनजन्यतावच्छेदकस्यतत्तद्व्यक्तिविश्रामोदुर्वारएवंविप-
रीतज्ञानप्रतिबध्यतावच्छेदकशरीरेऽप्यव्यवहितोत्तरत्वस्यावश्यकतयातदननुगमात् तदभावजन्यतावच्छेद-
कस्यतत्तद्विपरीतज्ञानाव्यवहितोत्तरत्वाभावकूटगर्भत्वात्गौरवंदुर्वारमेवयत्तुविशेषदर्शनजन्यप्रत्यक्षं ६
व्याप्यधर्मविशिष्टधर्मिविशेष्यकमेवतदनंतरंनतथातथाचतथात्वातथात्वयोर्विशेषदर्शनविपरीतज्ञाना-
भावजन्यतावच्छेदकप्रवेशेनैवव्यभिचारवारणेनानंतर्यप्रवेशइतितदपिनकरादिमान्पुरुषइत्यादिनिश्चय-
कालीनकरादिमत्त्वनिश्चयद्रूपावच्छेदकधर्मनिश्चयस्यपुरुषत्वादिनिश्चायकतयातज्जन्यनिश्चयेविपरीतज्ञा-
नाभावव्यभिचारस्यानंतर्यमनिवेश्यदुर्वारत्वात्करादिमत्त्वावच्छिन्नविशेष्यकत्वस्यविपरीतज्ञानाभावज-
न्यतावच्छेदकत्वेकरादिमान्पुरुषइत्यादिनिश्चयशून्यकालीनकरादिमत्ताग्रहोत्तरजातस्यकरादिमानयंपु-
रुषइत्यादिप्रत्यक्षस्यासंग्रहप्रसंगात् यत्तुविपरीतज्ञानविरोधित्वेनैवविशेषदर्शनादीनांहेतुतातत्त्वंचविप-
रीतज्ञानाव्यवहितपूर्वत्वशून्यक्षणवृत्तित्वविशिष्टत्वं तदवच्छिन्नंचनिश्चयपूर्वंसर्वत्रैवसुलभमितिसामान्य

तोनिश्चयत्वमेवतज्जन्यतावच्छेदकमिति विपरीतज्ञानानन्तरं प्रत्यक्षे तदभावहेतुतापि नास्ति न चैवं वि-
शेषदर्शनोत्पत्तिकाले संशयानुत्पत्त्यापत्तिस्तस्य विलक्षणप्रतिबन्धकत्वात् विशेषदर्शनानन्तरमिव तदुत्पत्ति-
क्षणेपि निश्चयोत्पत्तिरिति वाच्यं इष्टत्वात् न च यत्र संशयाद्यनन्तरमसत्यपि विशेषदर्शने न संशयादिस्तत्र
तन्निश्चयापत्तिरिति वाच्यं विपरीतकोटिभ्रमनिवर्तकविशेषदर्शनाद्यसत्त्वे उपस्थिततत्कोटिज्ञानोत्पत्तेर्बाध-
काविरहेणावश्यकत्वादिति तदप्यसत् अव्यवहितपूर्वत्वस्य तत्तद्व्यक्तिघटिततया गौरवादिति एवं विशेष-
दर्शनानन्तरं हेतुत्वे दोषः इति कारस्याप्यनुमते संशयोत्तरं विशेषदर्शनासत्त्वे संशयजनककोट्युपस्थितिधर्मि-
ज्ञानादिघटितस्य सामग्रीबलात् संशयस्यैवोत्पादेन संशयान्यज्ञानत्वरूपनिश्चयत्वावच्छिन्नाप्रसक्त्या योगा-
तत्तत्सामग्र्यभावसहितज्ञानसामान्यसामग्र्याः एव तज्ज्ञानान्यज्ञानत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् अ-
थैवं संशयसामग्र्याः सत्त्वे निश्चयोत्पत्त्यापत्तिः संशयप्रयोजकविशेषादर्शनस्याभावो विशेषदर्शनेन तन्निश्च-
येहेतुत्वं स्यादिति चेन्न तत्प्रयोजकाभावस्य तदन्यत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् अन्यथा घटज्ञानान्य-
घटज्ञानत्वावच्छिन्नोत्पत्त्यापत्तिस्तस्य घटादिज्ञानसामग्र्यभावस्य घटज्ञानान्यज्ञानत्वावच्छिन्नहेतुताप्रसंगा-
त् विपरीतनिश्चयानन्तरं च तेन प्रतिबन्धादेव न प्रत्यक्षं विपरीतनिश्चयस्य प्रत्यक्षसाधारणलौकिकसन्निकर्षा-
द्यजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वात् विपरीतनिश्चयानन्तरं विशेषदर्शनेपि तत्राभानान्तर-
मेव प्रत्यक्षं जायते यत्र भूतले घटो नास्तीति प्रमाहार्यादिनिश्चयानन्तरं लौकिकसन्निकर्षवशात् घटाद्यवगा-
हितत्संशयः कथं नोत्पद्यते लौकिकसन्निकर्षाजन्यतज्ज्ञानस्यैव तदभावनिश्चयप्रतिबध्यत्वात् अलौ-
किकनिर्णयान्यतद्धर्मिज्ञानत्वं तदभावनिश्चयाभावजन्यतावच्छेदकं वाच्यं एवमपि याहंशसामग्रीबला-

गदा॰

9

त् लौकिकप्रत्यक्षे घटोभासतेतत्सहितघटाभावेभानसामग्रीतः संशयायापत्तिर्दुर्वारैवेतिनिश्चयेपि
विशेषसामग्र्यन्तरं कल्पनीयं तच्च निश्चयविपरीतज्ञानविरोधितावच्छिन्नमेवेति विशेषदर्शनस्यापितेनरू
पेणहेतुत्वमायातीति · तदसत् लौकिकसामग्र्याबलवत्त्वाद्विपरीतकोटिभानप्रतिबंधादुक्तसंशयाप
प्रयोगात् तत्प्रतिबंधकत्वाकल्पने उक्तबाधनिश्चयानंतरं लौकिकसंनिकर्षाद्यत्र वास्तवो घटादि
निश्चयस्तत्र घटाभावभानप्रतिबंधकासत्त्वेन तज्ज्ञानापत्त्यासंशयोत्पादस्यब्रह्मणापिदुर्वारत्वादि
ति विशेषदर्शनहेतुतायानिर्विवादात्मतत्त्वमुक्तसंशयोत्तरप्रत्यक्षानिश्चयेविशेषदर्शनहेतुत्वेघटा
दिप्रकारकमानसेच्छाविरहविशिष्टघटाभावादिशाब्दसामग्र्याः योग्यतासंशयात्मकघटादिसं
शयघटितायाः घटादिमानसेप्रतिबंधकत्वेनकल्प्यतइतिलाघवं तदानींघटाभावादिमानसेता
दृशशाब्दसामग्र्याः प्रतिबंधकतयामानसघटादिसंशयस्यविशेषदर्शनरूपकारणविरहेणैव
चघटादिमानसनिश्चयस्यचवारणसंभवात् विशेषदर्शनसत्त्वेचतस्यविपरीतकोटिशाब्दधीप्रति
बंधकत्वात् शाब्दसामग्र्यभावाज्जायतएवमानसमितिकेचिन्मिश्रमतंपरिष्कुर्वंति तन्नदीधितिकारादि
मतेपिव्याप्यवत्ताधर्मिनिश्चयस्यविशेषणज्ञानादिविधयातदुत्तरप्रत्यक्षेहेतुतयातथाविधनिश्चयत्वे
नहेतुत्वाविवक्षातादृशसंशयोत्तरतादृशप्रत्यक्षतातिव्याप्तेरावश्यकत्वात् विशेषदर्शनस्यहेतुतामतइत्यभि
धानमयुक्तमितिचेन्न निश्चयत्वेनहेतुत्वाविवक्षणेमिश्राणांमतेनातिव्याप्तिर्मिश्रमतेचतादृशनिश्च
यत्वेनापिप्रत्यक्षविशेषहेतुतेत्याशयेनतथाभिधानात् अन्येचतादृशनिश्चयत्वेनहेतुताविवक्षामाव
णेनतत्साधानश्चपितुतद्विवक्षयाप्रत्यक्षेतादृशनिश्चयत्वेनहेतुताविरहप्रदर्शनेनचेतिसामंजस्यात्

ग्रहणवता ह्रदानिश्चयजन्यतावच्छेदकानुभवत्वव्याप्यजातिमत्त्वविवक्षणेनात्यमतेः तद्व्याप्तिवित्त्याशयेन वि-
परीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनहेतुत्वामतेति व्याप्यभिधानं विशेषदर्शनस्य चेति च स्वार्थो भ्रमा
दिविरोधित्वेन ग्राह्याभावज्ञानविरोधित्वेन तत्त्वं प्रत्यक्षविशेषहेतुत्वं ज्ञात्वादिति विशेषदर्शनत्वरूपेणा-
हेतुत्वेऽधिकारे वटसंशये आलोकसमवधानान्निश्चयानुपपत्तिः एवं अंगमार्दितैलसंयोगादिरूपव्यंजकवि
रहाधीनसौरभादिसंदेहानंतरव्यंजकसमवधानेपि तन्निश्चयानुपपत्तिः न चाऽलौकिकत्वस्य विशेषदर्शनजन्य
तावच्छेदकत्वोपगमान्नेयमनुपपत्तिः तत्र घटसौरभादेर्लौकिकप्रत्यक्षस्यैव विशेषदर्शनं विनोत्पत्तेरिति वाच्यं
लौकिकसन्निकर्षसत्त्वेपि यत्र विशेषदर्शनाभावः हि तत्र दूरत्वादिदोषप्रयोज्यः प्रकृष्टत्वादिसंशयस्तत्र विशेषदर्श
नेत्पन्ने च लौकिकप्रत्यक्षेत्पन्ने विशेषदर्शनजन्यतावच्छेदकरूपेणालौकिकस्यापि प्रत्यक्षस्य संग्राह्यत्वा-
त् अत एव विशेषदर्शिनामनुमितिसामग्रीसत्त्वादनुमितिरेव भविष्यति न प्रत्यक्षमिति कथं तस्य प्रत्यक्षहेतु
ताद्रूप्याल्लिप्यसमानविषये प्रत्यक्षसामग्र्या बलवत्त्वमिति प्रत्यक्षमेव जायते नानुमितिरिति मणिकारेण समा
हितप्रत्यभिवादे विशेषदर्शनस्यालौकिकप्रत्यक्षमात्रहेतुत्वे ताहशप्रत्यक्षसामग्र्या अनुमितिसामग्र्यपेक्षया
हीनबलवत्त्वान्न तदसंगतेः यदि च विपरीतज्ञानोत्तरप्रत्यक्षत्वनिष्ठविशेषदर्शनजन्यतावच्छेदकशरीरे अलौकि
कत्वनिवेशोपि नक्षतिः दूरस्थे धर्मिणि ऊर्ध्वत्वादिसंदेहोत्पत्तिक्षण एव लौकिकसन्निकर्षात्तन्निश्चयादि
वारणाय दूरत्वादिदोषसमवधानकालीनप्रत्यक्षेपि विशेषदर्शनहेतुताया आवश्यकत्वात् तत एव दूरस्थधर्मि
णि संशयोत्तरमपि विशेषदर्शनं विना ऊर्ध्वत्वादिनिश्चयवारणसंभवादित्युच्यते तदापि संबंधादिभेदेन भि-
न्ननानाविधव्याप्यवगाहिविशेषदर्शनावच्छेदकधर्मदर्शनसाधारणविशेषदर्शनत्वस्यानुगतस्याभावेन तत्

गदा॰ नरूपेणहेतुत्वं न संभवतीति विपरीतज्ञानविरोधित्वमेवानुगमकं वाच्यमिति भावः अथ यद्यालोकसंयोगा-
दिसाधारणं विपरीतज्ञानविरोधित्वं तदा तत्कथमुपपद्यते घटत्वादावालोकसंयोगसत्त्वेपि तत्र चक्षुः
10 संयोगाद्यसत्त्वेन तत्सत्त्वेपि च दूरत्वादिदोषात् घटादिसंयोगात्मन्यालोकसंयोगत्वेन विपरीतज्ञानाविरोधि-
त्वात् अस्तु वा लौकिकप्रत्यक्षकारणान्तरसहितालोकसंयोगत्वेन तथात्वं तथापि तस्यात्मनि ष्ठोन्यः संबं-
धः अन्यस्य विशेषदर्शनस्येति उभयोरनुगतसंबंधो नैव च इति चेन्न लौकिकप्रत्यक्षकारणान्तरसमवहि-
तस्यात्ममनोयोगस्यैवात्मनिष्ठप्रत्यासत्त्यास्य विपरीतज्ञानप्रतिबंधकत्वोपगमेन तत्साधारणतद्रूपाव-
च्छिन्नविशेषदर्शनस्य समवायसंबंधेनैव हेतुतासंभवादित्यलमधिकेन तथाविधनिश्चयत्वेन हेतुता-
विवक्षणस्य प्रयोजनान्तरमपि दर्शयति अतएवेति लिंगवत्त्वादिलक्षणः वह्निव्याप्यधूमवत्त्वादिरुदितो
यो विशेषवाक्यार्थः सादृश्यविशिष्टे पदविशेषवाच्यत्वादिबोधकवाक्यप्रतिपाद्योऽर्थः तद्विषय-
कं ज्ञानं वह्निव्याप्यधूमवत्पर्वतसादृश्यो महानसपदवाच्य इत्यादिज्ञानजन्यायां महानसपदवाच्य इत्याद्यु-
पमितौ वस्तुगत्या साध्यव्याप्यत्वावच्छिन्नहेतुप्रकारकं पक्षाविशेष्यकं यज्ज्ञानं तज्जन्यत्वेपि ना-
ति व्याप्तिरित्यर्थः तथाविधवाक्यार्थेनेति पदवाच्यत्वविशिष्टवह्निव्याप्यधूमवत्पर्वतसादृश्यावच्छिन्न-
धर्मिज्ञानत्वेनेत्यर्थः यद्यपि भ्रमसाधारण्याय तादृशविशिष्टवाक्यार्थाद्यात्मकतत्तत्पदार्थानां परस्परोप-
लेख्यावगाहिज्ञानत्वेनायमितिति विशेषे हेतुतावच्छेदकत्वं तथा पक्षांशे व्याप्तिप्रकारेण हेतुमत्तावगाहिज्ञान-
त्वमप्युपमितिजनकतावच्छेदकं तथापि पक्षांशे व्याप्त्यभावानवगाहिज्ञानत्वं हेतुमत्तावगाहिज्ञानत्वमुप-
मत्तामितिजनकतावच्छेदकं व्याप्यवत्त्वज्ञाननिश्चयत्वेनोक्तोपमितिजनकतावच्छेदकं अतिदेशवाक्यार्थज्ञा

नेव्याप्यवत्त्वस्यधर्मितावच्छेदककोटिनिविष्टतयाभानाद्धर्मितावच्छेदकघटकांशेचसंशयस्यानभ्युपगमा
त्तदुपमितिजनकतायांतादृशनिश्चयत्वनिवेशस्यानर्थक्यात्तेनतादृशतद्रूपावच्छिन्नजनकताकत्वरूपा
नुमितिलक्षणस्यनत्रातिव्याप्तिः अतएवनिश्चयत्वपर्यन्तनिवेशनमप्यर्थवत् अन्यथानिश्चयत्वेनानुमिति
जनकत्वेप्यधिकंत्वित्यादित्यापादनुमितिजनकतायाः पक्षविशेष्यकव्याप्यवत्ताज्ञानत्वावच्छिन्नत्वात्तादृशज्ञा
नत्वावच्छिन्नजनकताकत्वनिवेशमात्रेणभ्रमादिविरोधित्वावच्छिन्नहेतुताकप्रत्यक्षविशेषातिव्याप्तिवा
रणासंभवेनतदानर्थक्यमापद्येतवस्तुतस्तुवह्निव्याप्यवत्त्वेनपर्वतस्तादृशोमहानसपदवाच्यइत्यतिदेशवा
क्यार्थज्ञानसहकृतव्याप्यवत्ताघटितसादृश्यज्ञानजन्यायामुपमितौनकतावच्छेदककोटौव्याप्यांशेपर्व
तादिवृत्तित्वावगाहित्वस्याधिकस्यनिवेशोपिधर्म्यंशेव्याप्यवत्तावगाहिनिश्चयत्वरूपानुमितिजनकतावच्छे
दकावच्छिन्नहेतुताकत्वस्यतादृशोपमितावक्षतत्वादतिव्याप्तेर्वारणायतादृशनिश्चयत्वपर्यन्तमहेतुताव
च्छेदकत्वपर्यन्तनिवेशनमावश्यकंतथाचानुमितिजनकतावच्छेदकतायादृशसमुदायपर्याप्तातादृशसमु
दायस्यैवलक्षणेनिवेशनमावश्यकंअन्यथासमुदायपर्याप्तावच्छेदकतायाएकदेशापर्याप्ततयाऽसंभवा
पातात् अतएवज्ञाननिश्चयत्वघटकाभावदलस्यापिसार्थकता एवंचाप्रामाण्यज्ञानानास्कंदितत्वस्य
कारणतावच्छेदकतामतेतदंशोपिलक्षणेनिवेशनीयः नचसादृश्यज्ञानस्योपमितिहेतुतायांपर्वतादि
वृत्तित्वावच्छिन्नव्याप्यादिविषयतापर्वतादिवृत्तित्वावच्छिन्नविषयतात्वेनैवनिवेश्यानतुव्याप्यादिविषयता
त्वेनप्रयोजनाभावात् तथाचानुमितिजनकतावच्छेदकधर्मस्योक्तोपमितिजनकतावच्छेदककोटिनिवेशो
पिनास्तिकिंपर्याप्तिनिवेशेनेतिवाच्यं व्याप्यवत्त्वघटितसादृश्यावच्छिन्नधर्मिकातिदेशवाक्यार्थज्ञानस्यतद

गदा॰

घटितसादृश्यज्ञानसहकारेण फलजनकतया उभयत्र सादृश्यात्मकतादृशधर्माणां विशिष्यावश्यंनिवेशनीयत्वात्
नचपर्याप्तिविवक्षायामपि धूमव्यापकवह्निमत्सादृश्यात्मकंतादृशधर्माणांविशिष्यावश्यंनिवेशे निर्धूमवह्नि-
निश्चयजन्योपमितावतिव्याप्तिर्नशक्यते वारयितुमिति वाच्यं सादृश्यघटकभेदविषयतायामपि प्रवेशेन विव-
क्षितनिश्चयत्वेन तत्कारणतावच्छेदकतापर्याप्तिविरहात् लाघवाद्गवादिघटितसादृश्यज्ञानमेवोपमितौ कारण-
मिति तत्र नशंकनीयं तथा सति गवादावपि तादृशसादृश्यनिश्चयसत्त्वेन गवयादिपदवाच्यत्वोपमित्यापत्तेः यदि च
वैधर्म्यज्ञानादप्युपमितिः स्वीक्रियते वैधर्म्यस्य च इतरवैधर्म्यत्वेन ज्ञानं नापेक्ष्यते तदा व्याप्यधर्म्यज्ञानजन्यो-
पमितावतिव्याप्तिः कारणतावच्छेदकतापर्याप्तिनिवेशेऽपि दुर्वारेति तन्निवारणप्रकारश्चिन्त्यः महावाक्यार्थवि-
षयकशाब्दबोधे अवान्तरवाक्यार्थविषयकनिश्चयस्य तादृशनिश्चयत्वेनैव हेतुता एवं विशिष्टपदार्थगो-
चरशाब्दबोधेऽपि विशिष्टपदार्थोपस्थितेः तद्विषयकनिश्चयत्वेनैव हेतुता नापि विशेषणांतरप्रवेश इत्यभि-
मानेन शाब्दबोधविशेषेऽतिव्याप्तिमाशंक्य तेन चेत्यादिना उपनयार्थज्ञानेति उपनयवाक्यप्रतिपाद्यसा-
ध्यव्याप्यहेतुमत्पक्षरूपांतरवाक्यार्थज्ञानेत्यर्थः न्यायार्थज्ञानेति निगमनसहकृतोपनयजन्यवह्निव्या-
प्यधूमज्ञानाद्व्याप्यवह्निमानित्यादिमहावाक्यार्थज्ञान इत्यर्थः तेन प्रतिज्ञादिपंचवाक्यात्मकन्यायस्य विशि-
ष्टैकार्थज्ञानजनकतायाः स्वयं दूषणीयत्वेऽपि न क्षतिः यद्यपि वह्निव्याप्यधूमवांश्चायमित्याकारकोपनयजन्य-
बोधे व्याप्यवनपवाभेदो धर्मिणि भासते न तु व्याप्यस्य व्याप्यतावच्छेदकः संबंधः नामार्थयोरभेदान्वयबो-
धस्याव्युत्पन्नत्वात् तथा च नातिव्याप्तेरवसरः पक्षांशे व्याप्यप्रकारकज्ञानस्यैव लक्षणाघटकत्वात् प-
त्रतादात्म्यसंबंधेन धर्मिणो हेतुतात्र व्याप्यस्य पक्षांशे तेन संबंधेन उपनयप्रतिपाद्यत्वेऽपि व्याप्याभेदस्यैव हे-

तौ भानान्तरंशे व्याप्तिप्रकारकत्वाभावेन नातिव्याप्त्यवसरः तथापि तादात्म्यसंबंधावच्छिन्नव्याप्तिविशिष्टधर्मिरूपहेतुपरतच्छब्दघटितस्य समवायमिति वाक्यस्य प्रतिज्ञायविशिष्टार्थे निगमनार्थस्य वाक्यस्याविवर्थस्यान्वयबोधः तत्रातिव्याप्तिपरोयं ग्रंथः साध्यव्याप्यहेतुविशिष्टपक्षपर्यंतपरतच्छब्दजन्यबोधातिव्याप्तिपरः तच्छब्देनेत्यग्निमयं धूम इति न्यायेन व्याप्यविशिष्टपक्षरूपवाक्यार्थज्ञानजन्यतामादाय तत्घटितमहावाक्यार्थबोधे संयोगादिसंबंधेन पक्षांशे व्याप्यप्रकारकज्ञानजन्यबोधे तिव्याप्तिमाह तच्छब्देनेति तादृशविशिष्टार्थवाचकपदाभावात् सर्वनामानुधावने सर्वनाम्नो विशेषरूपेणोपदार्थोपस्थापकतामतएव तज्जन्योपस्थितेः पक्षविशेष्यकव्याप्तिविशिष्टहेतुप्रकारकानिश्चयरूपमतो नासंभवः ननु वन्हिबुद्धिस्थत्वेनोपस्थापकता मत इत्यविवादायाह संकेतेति नयशाह्यां तदोगावेन व्याप्तिविशिष्टहेतुविशिष्टपक्षे आधुनिकसंकेतशालिनायघटादिपदेनेत्यर्थः इदमुपलक्षणं विशिष्टपक्षलाक्षणिकपर्वतादिपदेन चेत्यपि बोध्यं व्याप्यादिविशिष्टोपस्थितिद्वारा व्याप्यवच्छिन्नहेतुविशिष्टपक्षोपस्थितिद्वारा जनितेति वह्निव्याप्यधूमवान्पर्वतो इत्याकारकशाब्दबोधेऽतिव्याप्तिः तत्तत्पदार्थघटितमहावाक्यार्थबोधे कथमतिव्याप्तिः उपनयार्थज्ञानस्य पक्षविशेष्यकव्याप्यप्रकारकज्ञानत्वेन तद्धेतुतायाश्च प्रामाणिकत्वात् तज्जन्यपदार्थज्ञानत्वेन तदन्वयबोधे हेतुत्वादेवानुपस्थितपदार्थान्वयबोधाप्रसक्तेः न च विरुद्धाः सकलपदार्थोपस्थितावप्यवान्तरवाक्यार्थज्ञानं विना तद्घटितमहावाक्यार्थस्तद्विषयकज्ञानत्वेन महावाक्यार्थज्ञाने हेतुत्वं आवश्यकमिति वाच्यं दंडी कुंडली वासस्वी चैत्र इत्यादौ दंडादिविशेषणान्वितचैत्रादिज्ञानं विनैव तादृशवाक्यार्थघटिततावद्विशेषणान्वितविशेष्यरूपमहावाक्यार्थधियः समूहालंबनरूपतावत्पदार्थाव।

गाहित्वस्य नितरां त्वन्मते मणिकृता स्वीकारादित्यत आह । अन्यादृशेष्यत इति महावाक्यार्थज्ञानस्यैव विशिष्टवाक्या
र्थेनापरपदार्थसंसर्गावगाहिज्ञानस्यावान्तरेति तादृशविशिष्टार्थविषयकज्ञानत्वावच्छिन्नजन्यत्वमित्य
र्थः अयं भावः यादृशस्य विशेष्यस्य विशेषणस्य वा शाब्दोपस्थितिः तादृशेनैव विशेषणान्तरस्य विशेष्यान्तर
स्य वान्वयबोधोनुभवसिद्धः यत्र च कर्मपदेन एकस्मिन्धर्मिणि समूहालंबनोपस्थिततया नाविशेषणान्वय
बोधः तत्र विशेषणानां तुल्यतया भानान्नासावेकवि-शेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोधः अतो न
तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यं विशेष्ये वा यत्र वि
शेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते स बोधो विशिष्टविषयकबोधादेवोत्पद्यते न तु विशिष्टं केवलसमूहालंब
नात् अत एवेष्टविशेष्यकोपायसाध्यताज्ञानस्य प्रवर्तकतामाशंक्य तन्यते विधिवाक्यात् वाक्यभेदभिया
कृतिसाध्ययागसाध्यमिष्टमित्येतादृशसमूहालंबनविलक्षणविशिष्टयागविशेषणकबोधस्यैव स्वी
कार्यतया तदर्थमन्तराकृतिसाध्यो यागः इत्यवान्तरवाक्यार्थबोधस्य कल्पनीयतया यागो स्वं उपायविशेष्य
कफलसाधनताबोधस्य प्रवर्तकत्वे चाहृस्यैवैकवाक्यद्वयमिति रीत्या कृतिसाध्यत्वेष्टसाधनत्वरूपविशेष
णद्वयावगाही यागः कृतिसाध्य इष्टसाधनं इति बोधः स्वीक्रियते इति लाघवमित्युक्तं विधिवादे मणिका
रेण विशिष्टेन सममन्यान्वयबोधे विशिष्टधियो हेतुत्वे तादृशान्वयतात्पर्यधीघटितशाब्दसामग्र्या भिन्न
विषयकप्रत्यक्षादिप्रतिबंधकतायां विशिष्टविषयकैकोपस्थितिर्निवेश्यते अन्यथा तत्स्थाने तत्तद्विशेष
णविशेष्योपस्थितिद्वयमतो लाघवादर्पितहेतुतासिद्धिः एवं चोपनयप्रतिपाद्यहेतुविशिष्टपक्षविशे
ष्यकोन्तरान्वयबोधात् इति व्याप्तिकेवंवाद्रेवेतिनञ तदा देविशेषरूपेणोपस्थापकतायां विचारासहत्वात्कथं तत्

तदादिपदजन्यशाब्दबोधे ऽतिव्याप्तिसंगतिः तथाहि तदादिपदस्य न घटत्वादिरूपविशेषधर्मविशिष्टे शक्ति
र्नानार्थत्वप्रसंगेन गौरवात् घटादिकं बुद्धिस्थीकृत्य प्रयुक्तात्तस्मात्तदादिबोधस्य शक्तिभ्रममंतरेणापि प्र
संगात् न च वक्तृगत्या यद्रूपावच्छिन्नं बुद्धिस्थीकृत्य यत्पदव्यक्तिः प्रयुक्ता तद्रूपावच्छिन्ने तस्याः शक्तिः अतो ना
यं दोष इति वाच्यं एवमपि पदव्यक्तिभेदेनानंतशक्तिकल्पनया गौरवात् यत्पदव्यक्तिप्रयोज्याप्रयोज्यहृद्गप्र
त्तिर्नोपलब्धा तत्पदव्यक्तौ शक्तेरगृहीतत्वेनातोन्वयबोधानुपपत्तेश्च अतः सामान्यतः स्वप्रयोक्तृत्व
बुद्धिस्थत्वं तदादिपदसामान्यशक्तिः कल्पनीया तथा तस्याश्च तत्त्वेनैवोपस्थितिः सर्वनामपदाद्विष्यति न
त्वविशेषरूपेण न च बुद्धिस्थत्वेन शक्यत्वमगमेपि तेन रूपेण बुद्ध्यन्तरोपस्थितिर्घटत्वादिरूपविशेषधर्मप्र
रकारेण बुद्धिस्थत्वरूपविशेषधर्मदर्शनात् उपलक्षणीभूतघटत्वादिप्रकारेणाशक्तिग्रहसंभव इति तेन
रूपेण न तत्पदादुपस्थितिर्दुर्लभा संबंधग्रहप्रकारतावाप्य एव सति प्रकारताप्रयोजकतया प्रकारांशे शक्ति
ग्रहानपेक्षणादिति वाच्यं इदमादिपदात् घटत्वादिप्रकारेण शक्तिभ्रमशून्यस्य शाब्दबोधान्वयात् शक्त्या
धीनोपलक्षणीभूतधर्मप्रकारेण शक्तिभ्रमशून्यस्य शाब्दबोधकोपस्थितेः शाब्दबोधानुपयोगित्वादित्यत आ
ह तदादेश्चेति विशेषरूपेणोपस्थापकत्वव्युत्पादयिष्यते इत्यनुषंगेणान्वयः अयमभिप्रायः स्वप्रयोक्तृ
बुद्धिप्रकारत्वेनानुगतीकृत्य घटत्वादिरूपविशेषधर्मविशिष्टेन तत्पदशक्तिः अतो न विशेषणभेदेन श
क्त्यानात्वं न वा विशेषधर्मप्रकारशाब्दबोधोपयोगिविशेषप्रकारकोपस्थितेर्दुर्घटता न च तादृशबुद्धिवि
षयत्वविशिष्टशक्तेर्बोधप्रसंगो किमेतावता प्रयासेन विशेषरूपेणोपस्थापकताविरहोपि ततिविरहादि
ति वाच्यं विशेषधर्मप्रकारसेषा पारिनिष्ठार्थमपि तदादिपदघटितवाक्यस्य प्रयोगात् विशेषप्रकारे

गदा॰ णशाब्दबोधस्य तद्रूपप्रकारकत्वनियमानुपपत्त्येतद्वादेर्विशेषरूपेणोपस्थापकतायाः स्वरूपेणोपपाद्यत्वात्
बुद्धिप्रकारत्वेन प्रवृत्तिनिमित्तघटत्वादीनामनुगमेऽपि तादृशधर्मस्याशक्यतया तदंशपरित्यागेन निर्विशे
13 षणकघटत्वादिप्रकारकबोधोपपत्तिः बुद्धिप्रकारत्वस्याशक्यत्वेऽपि तत्पदं बुद्धिप्रकारविशिष्टे बोधयतु
इत्याकारकभगवत् संकेतरूपशक्तौ तेनानुगतरूपेण घटत्वभानाच्छक्तौ चैवं बुद्धिप्रकारत्वस्य सं
केतविषयत्वेऽपि तस्य शक्योपलक्षणतानतु शक्यान्तर्भावेणाविशेषणत्वे तदुपलक्षितघटत्वादिप्रकार
त्वेनैव बोधस्य संकेतविषयतावच्छेदकत्वेन संकेतविषयत्वज्ञाने प्रयोजकं यथा घटत्वस्य घटपदज
न्यशाब्दबुद्धिप्रकारतायां च घटत्वावच्छिन्नो घटपदजन्यशाब्दबोधविषयतावान् भवत्वित्याकारकसं
केतीयशाब्दबोधविषयतावच्छेदकत्वेन विषयत्वज्ञाने तादृशसंकेतग्रहस्य घटत्वावच्छिन्नत्वाविषय
तानिरूपितसंकेतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविषयतावान् घट इत्याकारके शाब्दबोधप्र १२
कारतावच्छेदकतायां च शाब्दबोधविषयतावच्छेदकत्वेन संकेतविषयत्वज्ञाने यथा लोमत्वस्य पशुपद
जन्यशाब्दबोधप्रकारतावच्छेदकतायां लोमत्वावच्छिन्नलोमावच्छिन्नः पशुपदजन्यशाब्दबोधविष
यतावान् भवत्वित्याकारकसंकेतीयशाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वज्ञाने ता
दृशसंकेतग्रहस्य लोमत्वावच्छिन्ननिष्ठावच्छेदकताकत्वात् तत्संबन्धावच्छिन्नलोमनिष्ठप्रकारतानिरूपित
विशेष्यतावच्छिन्नाया शाब्दबोधविषयत्वप्रकारतातन्निरूपितविशेष्यतावान् लोमादिमानित्याकारकः प्र
कृते बुद्धिप्रकारत्वाश्रयावच्छिन्नः तत्पदजन्यशाब्दबोधविषयतावान् भवत्वित्याकारकभगवत्संकेतीय
शाब्दबोधविषयतावच्छेदकत्वेनाविषयत्वेन तद्बुद्धिप्रकारत्वस्य किं तु तदंशे संकेतेन शाब्दबोधविषयता

वच्छेदकतासामानाधिकरण्यस्यैवावगाहनात् संकेतीयशाब्दबोधविषयतावच्छेदकतासमानाधिकरण
त्वेनैवविषयत्वमितितस्यतत्पदजन्यशाब्दबोधप्रकारतावच्छेदकत्वनिर्वाहः इदंचविशिष्टशक्तपदस्थलेउपलक्षि
तवाचकगगनादिपदस्थलेचयद्धर्मधर्मितावच्छेदकीकृत्यशाब्दबोधविषयत्वेनसंकेतविषयत्वग्रहः तद्धर्म
प्रकारकएवबोधउपपद्यतइतितत्रशब्दाश्रयत्वाद्यनियतधर्मप्रकारत्वबोधनिर्वाहः दीधितिकारास्तुसर्वत्रै
वशाब्दबोधप्रकारतायांतदवच्छेदकतायांचसंकेतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यताव
च्छेदकत्वंतदवच्छेदकत्वरूपशक्यतावच्छेदकतात्वंतदवच्छेदकत्वज्ञानंहेतुः यथाघटपदपशुपदस्थले
घटत्वलोमत्वादेः गगनपदस्थलेचशब्दाश्रयत्वस्यैवनिरुक्तशक्यतावच्छेदकत्वमतत्वात् शब्दाश्रयत्वप्रका
रकएवशाब्दिभ्रमाजन्यबोधइतिघटगगनपदयोरविशेषइतिवदंतितन्मतेभूडिप्रकारत्वस्यशाब्दबोधप्रका
रतानवच्छेदकत्वेरूपपादनीयेआहार्यादिपदस्थलेउपलक्षणीभवताकेनाप्यनुगतरूपेणप्रवृत्तिनिमित्ता
नामभानात्शक्यस्वरूपस्यदृष्टनुगतरूपसत्वेपिशाब्दिभेदाभावात्तानार्थतानिर्वाहः भूडिप्रकारविशिष्टवाचकं
तत्पदमितिसर्वोपसंहारेणव्युत्पत्तिसौकर्यादेवंचैत्रत्वादिविशिष्टेतरादिघटितवाक्यात्प्रवृत्त्याद्युप-
लंभेपिनतत्प्रकारकशाब्दबोधस्यतदादिपदादनुपपत्तिः अथसामान्यतोव्युत्पत्तेश्चैत्रत्वाद्यपूर्वधर्मवि
शिष्टगोचरत्वेपिस्वरूपतःतद्धर्मप्रकारेणशक्यग्रहात् स्वरूपतःतत्प्रकारकोपस्थितेस्ताहृशशाब्दबो-
धस्यचानुपपत्तिः जातिमान्हस्तीत्येकसंबंधीतिज्ञानात्स्वरूपतोहस्तित्वादिप्रकारकस्मरणानुदयात्स्वरू-
पतःतत्प्रकारकस्मृतौस्वरूपतःतत्प्रकारकधीयएवहेतुत्वात् यत्रअननुगमकधर्ममोषवशात्सामान्य
॥५१॥ व्युत्पत्त्यधीनंस्वरूपतःश्चैत्रत्वादिप्रकारकशाब्दिस्मरणंत्रघटमितितत्रताहृशचैत्रत्वादिप्रकारकपदार्थोप-

गदा॰ स्थितिशाब्दबोधयोर्नानुपपत्तिरिति तदुक्तस्वरूपतत्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकानुभवस्य हे
तुतायाव्यवस्थापनान्मोघत्वेन तद्धि विशिष्टतत्प्रकारकानुभवाद्विशिष्टतत्प्रकारकस्मरणानुपपत्तेरिति चे
14 न्न कारणाहितानिर्विशेषणकचैत्रत्वाद्यवच्छिन्नेवक्तृबुद्धिविषयताग्रहे बुद्धिविषयतावच्छेदकविशिष्टवा
चकतत्पदमिति स्मृतौ सत्यामविशिष्टचैत्रत्वादिविशिष्टवाचकतायास्तद्धटादिपदे मानसज्ञानस्यैवानन्ततः
संभवेन सामञ्जस्यात् नचैवमपि स्वप्रयोजकबुद्धिप्रकारत्वेन स्वपदार्थस्याननुगमेन सकलतत्पदस्यो
पसंहारेण व्युत्पत्तिर्न घटत इति यत्पदव्युत्पत्त्यधीनप्रवृत्तिनिमित्तोपलक्षणज्ञानस्यानुगतत्वानुपपत्तेः तदधीनशाब्दबोधानु
पपत्तिरिति वाच्यं तदननुगमेऽयोज्ञातस्यावाहितैः परिचिन्तनीयत्वादित्यलमधिकेन तत्रानतिरिक्तेति शाब्दबो
धानिरूपितावान्तरवाक्यार्थबोधपदार्थोपस्थितिनिष्ठजनकतावच्छेदकगर्भमत्रमितिजनकतावच्छेदको
त्ताधर्मो प्रविष्टस्य पदवृत्तिज्ञानजन्यत्वस्य निवेशादित्यर्थः इदं तु बोध्यं अवान्तरवाक्यार्थबोधस्य महा
वाक्यार्थबोधस्य च महावाक्यार्थबुद्धेः शाब्दत्वजातिपुरस्कारेणैव कारणतानन्तु पदजन्यत्वेन गौरवा १४
त् नच तथा सति विशिष्टविषयकशाब्दबोधादेव विशिष्टे गृहीतवृत्तिकपदजन्यविशिष्टस्मृतेरपि वि
शिष्टे इतरान्वयबोधोत्पत्त्या तत्र विशिष्टविषयकशाब्दधियो व्यभिचारः स्यादिति तादृशस्मृतिसाधार
णपदजन्यत्वेन हेतुत्वमावश्यकमिति वाच्यं पदज्ञानजन्यत्वेन स्मृतिशाब्दधियोरनुगमे पदरूपलिंगज्ञान
जन्यार्थविषयकानुमितितोऽपि शाब्दधीप्रसंगात् वृत्तिमत्पदज्ञानजन्यस्मृतित्वशाब्दत्वाभ्यां कारणत्व
द्वयस्यावश्यकत्वात् मिथो व्यभिचारस्यागत्या तत्तत्कारणाव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशे
नैव वारणीयत्वात् यत्रावान्तरवाक्यार्थबोधान्महावाक्यार्थबोधानन्तरमवश्यं कल्पनीयतया नस्याः स

कल्पपदार्थविषयकत्वोपगमेन पदार्थस्मृतेरेवांतरवाक्यार्थधीजन्यशाब्दबोधे व्यभिचारवारणं तेन सम्यक्त्ववि-
शिष्टगृहीतवृत्तिकपदाधीनविशिष्टस्मृतेरिव विशेष्यमात्रगृहीतवृत्तिकपदाधीनाया उद्बोधकांतरवशात्तद्विशेष्य-
मवगाहमानाया विशिष्टस्मृतेस्ततो व्याप्यविशिष्टपक्षादिविषयकेन शाब्दान्वयबोधवारणाय गृहीतविशिष्ट वृत्ति-
कपदजन्योपस्थितित्वेनैव विशिष्टविषयकस्मृतेश्शाब्दान्वयबोधहेतुतायावश्यकत्वात्तथाविशिष्टवृत्तिगृहीतानपेक्षा
वांतरवाक्यार्थशाब्दधीजन्यबोधेतस्यावश्यकत्वात् प्रकारांतरेण तावत्पदार्थविषयकस्मृतिकल्पनायाश्चाकिं-
चित्करत्वात् अतोप्यवांतरवाक्यार्थधियः शाब्दत्वप्रकारेण कारणत्वं तत्रमावश्यकमिति पदजन्यत्वपदेप-
दाजन्यबोधव्यावृत्तधर्मपरं तच्च शाब्दत्वादिकमपीति स्वाधिकप्रवेशेन निरुक्तानिश्चयत्वपर्याप्तजनकतावच्छे-
दकताघटितस्थलत्वलक्षणस्य नातिव्याप्तिरित्यत्रा निश्चयत्वाप्रवेशेन पर्याप्त्यनिवेशेनापि नातिव्याप्तिरित्याह निश्च-
यत्वेति परोक्तसंशयानभ्युपगमेन संशयान्यत्वस्योक्तयत्नया शाब्दत्वादौ निवेशनीयतयाज्ञानत्वस्यैव पदजन्य-
बुद्ध्यव्यावर्तकत्वादिति भावः व्याप्तिविशिष्टहेतुरूपविशेषणतावच्छेदकविशिष्टस्य तद्विशेषणधर्मितावच्छे-
दकपर्वतत्वाद्यवच्छिन्नस्य वैशिष्ट्यावगाहिनि शाब्दबोधादौ प्रत्यक्षादिसाधारणविशिष्टवैशिष्ट्यबोधनिष्ठविशे-
षणतावच्छेदकप्रकारकनिश्चयजन्यतामादायातिव्याप्तिं शंकते नन्वेत्यादिना तथापि अवांतरवाक्यार्थबोधा-
दिनिष्ठशाब्दबोधासाधारणकारणतामादायातिव्याप्तेरुक्तरीत्या वारणेपि तत्र हि विशिष्टवैशिष्ट्यज्ञानं प्रतीतिप-
र्वतत्वादिरूपधर्मितावच्छेदकावच्छिन्नविशेषणतापन्नव्याप्तिविशिष्टधूमादिविशिष्टवैशिष्ट्यज्ञानत्वाव-
च्छिन्नं प्रतीत्यर्थः तत्र हि शेषणतावच्छेदकप्रकारकनिश्चयत्वेन पर्वतत्वावच्छिन्नविशेष्यकव्याप्तिविशिष्टधूमा-
दिप्रकारकनिश्चयत्वेन तादृशो वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधरूपे शाब्दबोधातिव्या-

गदा॰ मेवेति तत्वात्तस्यैव प्रथममुपन्यासः स्मृतिव्यावृत्तधर्मस्य जन्यतावच्छेदकत्वे स्मृतौ नातिव्याप्तिसंभवः उक्तपदव्या
वृत्त्यावगाहित्वात्तादृशविशिष्टवैशिष्ट्यबोधत्वरूपतात्पर्यविषयत्वेन संभवति अतः प्रत्यक्षादृशबोधमात्रे पादानं अथ
किमिदं विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकं विशिष्टवैशिष्ट्यबोधत्वेन विशिष्टप्रतियोगिकं यद्वैशिष्ट्यं
तदवगाहित्वं व्यधिकरणसंबंधावगाहिविशिष्टभ्रमे व्यभिचारात् नापि विशिष्टप्रकारकत्वं कांचनमयवह्नि
मानित्यादिभ्रमप्रकारीभूतविशिष्टाऽप्रसिद्ध्या तत्र कांचनमयो वह्निरित्यादिज्ञानानपेक्षणीयतापत्तेः नापि वि
शेषणतावच्छेदकप्रकारेणाभासमानप्रकारकत्वं रक्तो दंडः दंडवान् पुरुषः इति समूहालंबनस्थलेपि रक्तो दंड इति ज्ञाना
पेक्षाप्रसंगात् नापि विशेषणतावच्छेदकप्रकारकविशेष्यतावच्छिन्नप्रकारताकत्वं रक्तत्वादिप्रत्येकपदार्थोपस्थिति
स्थलके रक्तदंडवानिति ज्ञाने व्यभिचारात् नहि तादृशाकारकबोधो रक्तो दंड इत्यादिविशिष्टज्ञानानंतरमेव जाय
ते इति दीधिकारायत्तमतं बाधग्रंथे कांचनमयत्वविशिष्टवह्नेरप्रसिद्धत्वात् उपनीतकांचनमयत्वादिविशि १२
ष्टवह्निवैशिष्ट्यानुमितिः शुद्धवह्नित्वाद्यवच्छिन्नव्याप्यधूमादिज्ञानादिना पर्वते न संभवतीति कथं तद्विरोधि
तया व्यधिकरणकांचनमयत्वावच्छिन्नवह्न्यभाववत्त्वस्य दोषांतरासंकीर्णबाधहेत्वाभासतेति मणिकारोक्तं विशि
ष्टविशेषणज्ञानं विनापि विशेष्ये विशेषणांतरविशेषणांतरमिति रीत्या तादृशानुमितिसंभव इत्यभिधायकत्व
येदूषणीयत्वात् विशिष्टव्याप्तिज्ञानं विनापि तत्तद्घटकप्रत्येकपदार्थोपस्थितिभ्यां विशिष्टपरामर्शोत्पत्त्यानु
मितिरिति मिश्रेणान्येन चाभिधानात् एकत्वविशिष्टकांतः पूर्वमज्ञानेपि तित्तिबुककर्तृकेत्यनुमितेरनेन स्वी
कृतत्वाच्च अथाऽऽहुः विशेषणांतररक्तत्वादिविशेष्यतापन्नदंडादिप्रकारक रक्तदंडवानिति ज्ञाने द्विधा रक्त
त्वाद्यवच्छिन्नप्रतियोगिकत्वेन दंडादिवैशिष्ट्यावगाहि तद्रूपानवच्छिन्नतद्वैशिष्ट्यावगाहि च तादृशविशि

ष्टसंयोगादेरेव दंडादिसंसर्गतया भानात् दंडादिविशेषणतापन्नरक्तत्वादेरेव वा स्वावच्छिन्नप्रतियोगिकसं-
योगात्मकपरंपरासंबंधेन घटत्वादौ प्रकारता   तादृशविशिष्टवैशिष्ट्यबोध एव विशेषणतावच्छेदकप्रकार-
कधीः कारणं न त्वविशिष्टविशेषणावगाहिन्यपि रक्तत्वादिकं वैशिष्ट्यप्रतियोगिन्युपलक्षणतयाऽवगा-
हमानो द्वितीयबोधेऽत एव च प्रतियोगिविशेषिताभावबुद्धौ घटो नास्तीत्याकारिकायां प्रतियोगिप्रकारीभ-
वतो घटत्वादेः प्रतियोगितावच्छेदकतयैव भानमिति तत्र घटत्वादिप्रकारकज्ञानापेक्षानियमः यद्यपि विशि-
ष्टविशेषणावगाहिज्ञानमात्र एव विशिष्टज्ञानापेक्षा यो मणिकाराद्युक्तनियमः तथापि लाघवोपनीतैकत्वा-
दिविशिष्टकर्माद्यन्वमितिर्विशिष्टज्ञानमनपेक्ष्यैवोत्पद्यत इत्यनुरोधाद्दीधितिकारादीनां दर्शितविशेषाद्दं-
डी नास्ति रक्तो नास्तीत्यादिज्ञानदशायां नियमतो रक्तदंडी नास्तीत्यादिज्ञानोत्पादविरह एव   उक्तविशिष्टवै-
शिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशेषणधीहेतुत्वकल्पकः रक्तो दंड इत्यादिज्ञानदशायामपि-
कदाचित्तादृशसमूहालंबनबुद्ध्युत्पद्यमानायां रक्तदंडी नास्तीत्यादिबुद्धेरनुत्पादे गत्यंतराननुगतस्यैव क-
स्यचित्प्रतिबंधकता कल्प्यत इति विविवेचनीयं चेदमधिकमन्यत्र केचित्तु रक्तदंडवानित्यादिज्ञानीयरक्तत्वा-
दिविशेष्यतापन्नदंडादिनिष्ठप्रकारता हि द्विविधा काचित्तद्दंडादिविशेषणतापन्नरक्तत्वाद्यंतर्भावेन पर्याप्ता-
काचित्तद्दंडादावेव तत्र प्रथमा विशेषणतावच्छेदकप्रकारकज्ञानादीनां   नापरा घटत्वादिविशेष्यतानिरू-
पितप्रकारतायाः रक्तत्वादिवृत्तित्वेन घटत्वान रक्तघट इत्यादिधीनिष्ठतादृशप्रकारताकोऽन्यज्ञानविरोधिनी इतर-
विशेषणतानवच्छिन्नायाः घटत्वादिविशेष्यतानिरूपितरक्तत्वादिप्रकारताया एव तत्प्रतिबध्यतावच्छेदकता-
दित्याहुः अपरे तु यथा विशेष्यतानिरूपितकारणतामात्रं न विशेष्यतावच्छेदकताभूतलं घटवदित्यादौ भूत

गदा. 16

लत्वादेर्दंडादिधर्मितावच्छेदकतावद्वैपरीत्यस्यापि प्रसंगात् अपितु विलक्षणैव विषयता सा च प्रकारतानि
कान्तरैर्न्यैव वा एवं विशेषणतावच्छेदकतापि विलक्षणा विषयता तन्निरूपकदंडादिनिष्ठप्रकारताविशेषणा
तावच्छेदकतापि विलक्षणा विषयतेति बोधविशेषणतावच्छेदकरक्तत्वादिप्रकारकज्ञानापेक्षा प्रत्येकोऽ
पस्थितिफलकं रक्तदंडवानित्यादिज्ञाने वनतथाविधलक्षणप्रकारतापन्नालीनिवद्रति तन्नोभयमपि स
म्यगिव प्रतिभाति विशिष्टज्ञानपूर्वकयोर्विलक्षणाकारज्ञानयोर्विषयभेदमन्तरेण विषयतावैलक्षण्यऽ
स्याननुभवात् विशिष्टज्ञानकार्यतावच्छेदकतया तत्सिद्धिरित्यपि वालत्वायितं तादृशविलक्षणविषयऽ
तासिद्धावेव तन्नियामकतया विशिष्टज्ञानहेतुतासिद्धेः यदि च विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाऽ
हिनि बोध एवान्वयव्यतिरेकाभ्यां विशिष्टविशेषणज्ञानं हेतुः तज्जन्यतावच्छेदकं यदि विशिष्टप्रतियोगिकत्वा
वच्छिन्नसंसर्गताकबुद्धित्वेन तल्लाघवे वैलक्षण्यप्रवेशस्य कारणप्रकारताविशेषस्य कार्यतावच्छेदकत्वे लाघ १८
वमिति विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्येव ज्ञाने प्रकारताया व्यासज्यवृत्तित्वादिरूपवैलक्षण्यसिद्धिऽ
रपरत्राहेतुरुच्यते तदा न विवदामहे इति प्रकृतमनुसरामः ननु यथा विशेषणतावच्छेदकरक्तत्वाद्यंशे नीर्धर्मिऽ
तावच्छेदकतद्विशिष्टवैशिष्ट्यबोधे तत्प्रकारकज्ञानत्वेनैव हेतुत्वान्न संशयायान्यत्वप्रवेशः तथा दंडोंशे धर्मि
तावच्छेदकविशिष्टवैशिष्ट्यबोधेपि तन्निष्ठधर्मितावच्छेदकावच्छिन्नविशेष्यकतत्प्रकारकज्ञानत्वेनैव संशयऽ
साधारणी हेतुता स्वीक्रियते निश्चयत्वेन विशेषणतावच्छेदकप्रकारकधीहेतुतायामणि कारात्सिमभिधा
नादिति कथमतिव्याप्तिरतः तथा हेतुताम्प्रभवेन ह्युपपत्ति दंडो रक्तो न वेति नु दंडो रक्तो न वेति संशयानन्त
र रक्तदंडवानिति निश्चयानुत्पादस्यानुभवसिद्धेः स च विशेषणसंदेहे विशिष्टसंदेहस्यौचित्यावर्जितत्वा

रुपपद्यते निश्चयोत्पन्नो संशयस्तामग्र्यभावस्यापेक्षितत्वात् एकत्र दण्डवान्नवेति विशिष्टसंशयस्त्वनुभवसि
द्ध एवेति निश्चयत्वेन हेतुतायां साधकाभावेऽबाधकस्य च सत्त्वे अत्र केचित् यदि विशेषणतावच्छेदकप्र
कारकसंशयादपि विशिष्टवैशिष्ट्यबोध उपपद्यते तदा प्रामाण्याशंकास्कंदितादपि ज्ञानादनुपगमस्या
वश्यकः अप्रामाण्यसंदेहेन विषयसंदेहस्यैव जननात् संशये प्रामाण्यसंशयस्याकिंचित्करत्वात् अ
तोः प्रामाण्यनिश्चयास्कंदितज्ञानात् फलवारणाय प्रामाण्यनिश्चयानास्कंदितत्वेनैव हेतुता वक्तव्येति अप्रा
माण्यज्ञानीयग्रहणाश्चरनिश्चयत्वनिवेशात् गौरवं इत्यप्रामाण्यज्ञानानास्कंदितनिश्चयत्वेन हेतुत्वमेवोचि
तं विशेषणसंशयात् तद्विशिष्टसंशयात् उपपत्तिरूपबाधकमपि कथंचिदुद्धरणीयमिति वदंति वस्तुतस्तु संशयस्य
विशिष्टवैशिष्ट्यबोधजनकत्वे दण्डो रक्तो नवेत्यादिसंशयात् रक्तत्वतदभावोभयविशिष्टदण्डादिवैशिष्ट्यावगा
हिबोधोऽपि स्यात् न चेष्टापत्तिः तादृशज्ञानस्यैकत्र दंडादौ धर्मिणि विरुद्धोभयप्रकारकत्वात् तयोरेकत्वादिनि
श्चयत्वासंभवात् विशेष्यांतरविशेषणतापन्नधर्मिकसंशयस्यानुभवविरुद्धत्वात् तत्र संयत्वोपगमासंभवा
च्च अत एव च केवलविशेष्यविशेषणमात्रेण रीत्या रक्तदंडवानिति ज्ञानेऽपि उक्तसंशयः कार्यसहवृत्तितया प्रतिबं
धक इति वदंति नच तत्र संशयस्य प्रतिबंधकत्वेऽपि विशिष्टवैशिष्ट्यबोधसाधारणधर्मएव तत्प्रतिबध्यतावच्छेद
कोस्तु तावतैव च संशयानंतरं तद्विशिष्टवैशिष्ट्यबोधवारणे तत्र तत्प्रकारकज्ञानत्वेनैव हेतुत्वमुचितमिति वाच्यं
तत्संशयद्वितीयक्षणे कथंचित्तत्प्रकारकनिश्चयेन तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्यधीनिर्वाहाय विशिष्टवै
शिष्ट्यविषयताभिन्नवैशिष्ट्यविषयतायाएव संशयप्रतिबध्यतावच्छेदकत्वे वाच्यमिति निश्चयत्वेन विशिष्ट
वैशिष्ट्यबोधाहेतुत्वे संशयोत्तरं विनापि निश्चयं विशिष्टवैशिष्ट्यधीप्रसंगात् नचयत्र दंडे रक्तत्वसंशयः प्र

गदा. ष्टेवदंडस्यानुमितिसामग्रीरक्तोनवदंडस्य पुरुषे बाधग्रहस्थले तत्र संशयसत्त्वेपि केवलं विशेष्ये विशेषणमित्या
दिरीत्या रक्तदंडवान्पुरुष इत्याद्यनुमित्युत्पत्तेः कथं ताहृशबोधे संशयप्रतिबंधकतेति वाच्यं प्रत्यक्षे प्रत्यक्षत
17 त्प्रतिबंधकताया वक्तव्यत्वात् अलौकिकत्वमपि अत्र विशेषणं देयं संशयसत्त्वेपि लौकिकसन्निकर्षात् रक्तो
दंडवानयमिति ज्ञानोत्पत्तेः लौकिकप्रत्यक्षसामग्र्या विपरीतज्ञानविरोधितयैव विशेषधर्मिकालौकिकप्रत्य
क्षात्मकसंशयस्यनापत्तेः एवं च विशिष्टवैशिष्ट्यबोधव्यावर्तकाविशेषणावच्छिन्नेपि विशेष्ये विशेषण
मित्यादिरीत्या बोधे विशेषणे तद्विशेषसंशयस्य प्रतिबंधकत्वेपि दंडो रक्तो नवेति संशयबलादितरबा
धाकल्पनीतरक्तत्वादिविशेषितदंडाद्यनुमितेः रक्तत्वादिविशिष्टवैशिष्ट्यावगाहितया प्रसंगस्य ताहृशसं
शयानंतरं ज्ञानरक्तत्वादिविशेषितदंडादिप्रकारकालौकिकप्रत्यक्षे विशिष्टवैशिष्ट्यावगाहितया प्रसंगस्य
च वारणाय तदवगाहिरूढ्या विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वकल्पनमावश्यकं २
यत्त्वानिश्चयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे निश्चयत्वघटकयोः तदभावाप्रकारकत्व तत्प्रकारका
त्वयोर्द्वयोर्विशेषणविशेष्यभावविनिगमकाभावेन कारणताबाहुल्यमिति तदभावप्रकारकज्ञान
त्वेन संशयस्य प्रतिबंधकत्वमेव कल्पयितुमुचितं यत्र संशयद्वितीयक्षणे स्मरणादिना निश्चयः तद्द्वि प.
तीयक्षणे संशयनाशे सत्येव विशिष्टवैशिष्ट्यबोधउत्पद्यत इति तदसत् तथा सति जलप्रत्यक्षत्वानुमित्यादाव
पि लिंगादिसंदेहस्य तदभावप्रकारकज्ञानत्वेन प्रतिबंधकत्वापातात् निश्चयत्वात् निश्चयत्वावच्छिन्नहे
तुतानुमितिलक्षणासंभवापत्तेः यत्तु विशिष्टवैशिष्ट्यबोधं प्रति निश्चयत्वेन हेतुत्वे विशेषणसंशयजन्य
विशिष्टसंशयानुपपत्तिरिति बाधकं तदप्यकिंचित्करं दंडत्वसामानाधिकरण्येन रक्तत्वनिश्चयरूपकोटि

तावच्छेदकावच्छिन्नप्रसिद्धिस्थल एव चैत्रीयो दण्डो रक्तो न वेति विशेषणरूपावच्छेदेन रक्तत्वाभावावगाहि संशया-
द्रक्तो दण्डवान्न वा चैत्र इति विशिष्टसंशयोदयान्नथाविधनिश्चयस्य तादृशसंशयाद्रक्तो दण्डवान्न वा चैत्र इति
विशिष्टसंशयोदयान्नथाविविरोधित्वात् यन्नु तत्र विशेष्ये विशेषणानामित्यादिरीत्यैव विशिष्टकोट्यवगाहि-
संशयो न तु विशिष्टवैशिष्ट्यावगाहीति समाधानं तदसत् धर्मिणि रक्तत्वविशेषितदण्डादेस्तत्कोटितयाभान-
संभवेपि अभावांशे रक्तत्वादिविशिष्टदण्डादिवैशिष्ट्यभानस्यावश्यकत्वात् तदुपपन्ने दर्शितप्रकारं विना-
संभवात् न च लौकिकप्रत्यक्ष एवाभावांशे तद्धर्मविशेषितप्रतियोगिनि प्रकारतया भासमानेन तद्विशि-
ष्टवैशिष्ट्यावगाहित्वनियम इति संशये कोट्यंशे तद्रूपतयैव भानाद्विशिष्टवैशिष्ट्यानवगाहनसंभव इ-
ति वाच्यं दण्डसामान्याभावस्यैव रक्तत्वाद्युपलक्षितप्रतियोगिकत्वादभावांशे रक्तत्वादिविशिष्टदण्डादि-
रूपप्रतियोगिवैशिष्ट्यानवगाहनेन तादृशस्य दण्डादिसामान्याभावावगाहित्वे दण्डवानयमिति विशेष्यनि-
श्चयदशायां दण्डादौ रक्तत्वादिसंशयाद्विशिष्टसंशयानुपपत्तेरित्यधिकमन्यत्रानुसंधेयं दण्डो रक्तो न वेतीति संश-
यात्रव्यवसाये च रक्तत्वादिविशिष्टदण्डादिरूपविषयप्रकारेण न ज्ञानभानं किं तु दण्डादिविशेषणतापन्नरक्तत्वादि-
प्रकारकत्वेनेति न तदनुपपत्तिरिति संक्षेपः विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकसंशया-
न्यत्वेनैव हेतुता न तु तादृशसंशयान्यज्ञानत्वेनेति संशयान्यत्वस्य विशिष्टज्ञानरूपनिश्चयत्वावच्छिन्नकारण-
ताघटितलक्षणस्यानतिव्याप्तिरिति समाधेयं ज्ञानोपरमेपीत्यादिना ज्ञानत्वस्याप्रवेशादित्यन्ते न ज्ञानत्वस्या-
वच्छेदकगर्भाप्रवेशे हेतुगर्भविशेषणान्यूनवृत्तेरिति न्यूनवृत्तित्वं च अवच्छेद्याभिमतहेतुतायाश्च व्यापकत्वे ज्ञान-
त्वानिवेशे अनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षापत्तिः स्मरणावबोधकस्य हेतुतया प्रत्यक्षे तु तद्धि

गदा॰ रहस्याकिंचित्करत्वात् तेन विनापि ज्ञानेन विशिष्टवैशिष्ट्यप्रत्यक्षजननादिति त्वेतन्निवेशपं जगत्या॰
18 उद्बोधकासमवधानविशिष्टसंस्कारस्वभावस्याविच्छेदककोटौ प्रवेशेन तदापत्तेर्वारणीयत्वात् कालान्तरे उ॰
द्बुद्धसंस्कारादिविशिष्टवैशिष्ट्यावगाहिस्मरणनिर्वाहाय संस्कारभेदरूपेत्यविशिष्टसंस्कारत्वाभावान्न धा॰
वनं उद्बोधकसमवहिते संस्कारे च विशेषणाभावात् विशिष्टसंस्कारत्वाभावः स्वलभः भेदस्याप्यव्याप्यवृत्ति॰
त्वे तु उद्बोधकाभावविशिष्टसंस्कारभेद एव निवेश्यः अत एव ज्ञानत्वाप्रवेशे लाघवासंभवेन न्यूनवृत्तित्वमे॰
वतद्दलनिवेशप्रयोजकतयाऽभिहितं तद्विषयकगुणानां तत्र हेतुत्वे इति न्यूनवृत्तिताप्रकाशनाय तद्विषयके॰
गुणानां विशिष्टवैशिष्ट्यावगाहिनां इच्छाद्वेषकृतिसंस्काराणां ननु विशिष्टविषयकेच्छादिस्थलेपि तज्जन॰
कज्ञानस्यावश्यकत्वात् सर्वत्र ज्ञानमेव हेतुः नत्विच्छादिकमित्याशंकायां इच्छादेर्विशिष्टवैशिष्ट्यबोधहेतु॰
त्वे हेतुमाह ज्ञानोपरमेपीत्यादिना ज्ञानोपरमेपि इच्छादिजनकविशिष्टज्ञाननाशेपि वशिष्टविषयो॰
पसंधानेनेति दण्डत्वादिविशिष्टदण्डादिरूपविषयप्रकारेणेत्यर्थः इच्छाद्वेषयोः साक्षात्कारादित्यन्वयः दण्ड॰
दण्डमिच्छामि दण्डं द्वेष्मीत्याकारकइच्छाद्वेषसाक्षात्कारः इच्छात्वादिप्रकारकइति इच्छादिद्वितीयक्षणो॰
त्पन्नेच्छादिनिर्विकल्पकात् तृतीयक्षण एवोत्पन्नस्यानेन तत्पूर्वक्षण एवेच्छादिजनकं ज्ञानं नष्टमितीति न विशि॰
ष्टवैशिष्ट्यावगाहि इच्छादिप्रत्यक्षात्प्राक् तत्र ज्ञानसत्त्वमिति इच्छादिकमेव तत्र हेतुः यदि चेच्छा॰
त्वादिनिर्विकल्पकोपि विशिष्टविषयप्रकारेण इच्छादिकं भासते अत एव नरसिंहाकारकं तन्निर्विकल्पकं इति
सिद्धान्त इति उच्यते तदा दण्डदण्डेष्टसाधनमित्याकारकोपि यत्र विशिष्टविषयकफलसाधनताज्ञानं प्रत्य॰
मनंतरं च फलेच्छा तदनन्तरं च विशिष्टोपायविषयिणी इच्छा तत्रेच्छानिर्विकल्पकरूपो विशिष्टविषयकेच्छा गदा

साक्षात्कारेविशिष्टविषयकत्वेष्टसाधनताज्ञानानन्तरजातफलत्वेपजन्योपायत्वेचविषयकसाक्षात्का
रेचज्ञानस्यव्यभिचारोऽर्वागेवद्विलक्षणस्यापिनोज्ञानस्यतत्त्वेलक्षणएववनापादितिभावः ज्ञातिसाक्षात्कारव्य
वहितपूर्वंचज्ञानस्यविनष्टपरत्वस्यस्वत्वभावितमपिनेति सूचयितुंज्ञानेत्येणज्ञानिसाक्षात्कारेव्यभिचा
रंदर्शयतिज्ञानीचेति अत्रापिविशिष्टविषयोपधानेनेत्यनुषज्यते ननुविशिष्टबुद्धौविशेषणज्ञानस्यहेतु
तयाविशेषणज्ञानंविनाविशिष्टज्ञात्यादिसाक्षात्कारएवनभवितुमर्हतीतिआत्मापूर्वविषयस्मरणमेवक
ल्पनीयंतथाचविशेषणतावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्यापिनतत्रव्यभिचारइत्यतआह विशेष
णेतिज्ञानोपरमेपीत्यनुषज्यते रक्तत्वादिविशेषणज्ञाननाशेपिरक्तत्वादिविषयकाद्रक्तत्वादिविशिष्टदंडा
दिविषयकसंस्कारादेवतादृशविशिष्टविषयकस्मरणोत्पत्तेरित्यर्थः तथाचतत्रव्यभिचारभयेनविशेषण
ज्ञानस्यापिविशेषणविषयकत्वेनैवविशिष्टधीहेतुतावाच्यातथाचविशेषणविषयकज्ञात्यादितएवविष
यकज्ञात्यादितएवविषयविशेषितज्ञात्यादिसाक्षात्कारसंभवान्नज्ञानापेक्षेतिविशिष्टवैशिष्ट्यबुद्धावपिवि
शिष्टविषयकमात्रस्यहेतुत्वेऽस्यचविशिष्टवैशिष्ट्यावगाहिसंस्कारात्विशेषणतावच्छेदकप्रकारक
ज्ञानंविनैवतादृशस्मरणनिर्वाहोपीतिभावः एवमनुपनायकज्ञानस्यापिसविषयकत्वेनहेतुताअतोन
विषयोपनयार्थंज्ञानापेक्षेतिबोध्यं अत्रदृढसंस्कारादुपनीतभानवारणायच ज्ञानप्रत्यासत्तिहेतुताया
मवशिष्टसंस्कारभेदएवनिवेश्यः ननुउद्बोधकासमवधानविशिष्टसंस्कारत्वाभावादेःउद्बोधकसमवधा
नविशिष्टसंस्कारादुपनीतभानानुपगमेलक्षणविरहात् ततःस्मरणोत्पादेलक्षणविलंबेनैवोपनीतभाननिर्वा
हात् नचस्मरणाकल्पनेगौरवादविशिष्टसंस्कारत्वाभावनिवेशनमेवोचितमितिवाच्यं उक्तोद्बोधकानाम

गदा.

19

मनुगततयातद्भाव सहस्रानिवेशनीयतयामहागौरवात्लघुरूपेणकारणतासिद्धौतन्निर्वाहस्मरणका-
ल्पनागौरवस्यफलमुखत्वेनादोषत्वात् अतएवनिर्विकल्पकस्मरणकल्पनेनविशेषणधियोविशेषणज्ञानत्वे
नहेतुत्वमग्रेव्यवस्थापयिष्यते इदानींतुनिर्विकल्पकस्यतेनासिद्धौनसिद्धौकृत्यादिसाक्षात्कारस्यानवाविष
यस्मरणंविनैवानुभवासिद्धइत्याशयेनविशेषणज्ञानादिहेतुत्वमित्याकांक्षायामाह इच्छादितइतिव्याप्यव
त्त्वविषयकेच्छादितइत्यर्थः ज्ञानस्यचिरातीतत्वविरहेणकदाचिदिच्छादेरनुमितेस्तत्सादकतायामि-
ष्टापत्तिःसंभवतीत्याशयेनाह संस्काराद्येतिव्याप्तिविशिष्टपक्षविषयकसंस्काराद्येत्यर्थः नचविशिष्ट
वैशिष्ट्यबोधादिहेतुतायाः अनुद्बुद्धसंस्कारान्यत्ववत् अनुमितिहेतुतायामपिज्ञानत्वरूपेत्यसंस्का
राद्यन्यत्वस्येति अतएवेतिअगत्यातुविशेषणतावच्छेदकप्रकारकत्वरूपहेतुतायामवच्छेदकगौरव
सहितस्यतेतिभावःअतिव्याप्तिशंकयात्संस्काराद्यन्यत्वसत्त्वादिग्रंथेनावतरतिसंस्काराद्यन्यत्वेना १९
नुमितिहेतुत्वेऽप्युभयत्रएकरूपेणहेतुतायाअतिव्याप्तेरनवकाशात् ज्ञानत्वघटितधर्मावच्छिन्नका
रणताघटितलक्षणेऽसंभवशंकानिरासपरोऽयंग्रंथइत्यप्याहुः परामर्शप्रत्यक्षेप्रत्यनुमितावपिपरा
मर्शत्वेनहेतुतापरामर्शंविनाप्रत्यक्षानुदयादित्यभिमानमूलापरामर्शानुव्यवसायेऽतिव्याप्तिशंकातत्र
तत्रतेनरूपेणहेतुतानिराकरणेनिरस्यति नचेतिपरामर्शादिप्रत्यक्षेसाध्यहेतुप्रकारकपक्षविशेष्य-
कसंशयान्यज्ञानत्वरूपपरामर्शत्वेनहेतुतानिराकृते वस्तुगत्यायद्यत्प्रत्यक्षतानिरूपितविषयतानिरूपहेतुताव-
च्छेदकंतन्निर्धारयति सामान्यतइत्यादिनासामान्यतःप्रत्यक्षेप्रत्यक्षत्वरूपसामान्यधर्मावच्छिन्नविषय-
त्वेनेति विषयतायांत्वाश्रयविषययोरभेदेनभिन्नत्वेपिविषयतात्वमनुगमकं कारणस्यप्रत्यासत्तिः

तादात्म्यं कार्ये स्यालौकिकसन्निकर्षजन्यज्ञानस्याविलक्षणविषयता अत एवातीतादिविषयस्य न प्रत्यक्षवि
षयत्वं कार्याव्यवहितपूर्वक्षणावृत्तिविषयस्य कारणस्यानन्वतास्येनासंबद्धत्वात् अव्यवहितप्राक्क्षणवृ
त्तिकारणसंबंधस्य कार्यसंबंधप्रयोजकत्वात् अतीतानागतघटादिरूपविषये कार्याव्यवहितप्राक्क्षण
वृत्तित्वतः संयोगादेरसत्वेपि अतीतानागतशब्दरूपविशेषादौ इन्द्रियसमवायस्य सत्वेन न तत्प्रत्यक्षस्य विषयत
योत्पत्तिवारणाय विषयहेतुत्वमावश्यकं यदि चाव्यवहितप्राक्क्षणावच्छिन्नः कारणसंबंध एव कार्योत्पत्ति
प्रयोजकः न तु तदाह शब्दक्षणाद्यवृत्तित्वोपलक्षितकारणस्यापि संबंधस्य न तत्क्षणप्रतिबंधकसमवहितस्यापि देशा
न्तरेणावच्छेदेन तत्क्षणवृत्तिप्रतिबंधकात्यंताभावस्यान्यकालावच्छेदेनाधिकरणतया तत्र द्वितीयक्षणे
कार्यापत्तेः एवं चातीतादिविषयस्य वर्तमानकालासंबंधतयाऽवच्छेदाधिकरणसंबंधस्यैवावच्छेदकतयानि
त्यस्यापि संनिकर्षस्य वर्तमानकालावच्छेदेन न तत्र सत्वमिति प्रसंगः अथैवमतीतादौ विषये सामान्यप्रत्या
सत्यापि प्रत्यक्षं न जायेत तत्र वर्तमानकालावच्छेदेन नित्यस्यापि सामान्यस्यासत्वादिति चेन्न कारणताघटकं
व्यापकत्वं द्विधा क्वचिद्यत्र यदा कार्यं तत्र तदाव्यवहितप्राक्क्षणावच्छेदेन कारणमित्येवंरूपं क्वचिच्च यत्र यदा
कार्यं तत्र तदव्यवहितप्राक्क्षणवृत्ति कारणमित्येवंरूपं तत्र यस्य कारणता प्रथमोक्तव्यापकताघटिता तस्य
प्राक्क्षणावच्छेदेन देशसत्त्वं यस्य कारणता द्वितीयव्यापकत्वघटिता प्राक्क्षणवृत्तेस्तस्य यदाकदाचिद्दे
शसत्वं देशे कार्योत्पत्तिप्रयोजकं लौकिकसन्निकर्षादेः प्रत्यक्षहेतुतायां च प्रथमव्यापकत्वं सामान्यप्रत्यास
त्यादेस्तद्धेतुतायां च द्वितीयमिति नातीतादिविषयस्यालौकिकप्रत्यक्षप्रसंगो न वा सामान्यजन्यप्रत्यक्षानुपप
१५१ त्तिरित्यवधेयं तेन तदापि पूर्वक्षणावच्छिन्नसन्निकर्षाद्विषयताया कालेप्रत्यक्षापत्तिवारणाय विषयस्य कार्ये सहभा

गदा०

20

वेन हेतुत्वमावश्यकं यदि चाविषयनाशोत्पत्तिकालेपि प्रत्यक्षत्वमिष्यते संबंधं वर्तमानं च गृह्यते चक्षुरादिनेति
प्रवादस्तत्प्राकृतत्वाण वर्तमानतत्परः अत एवाशुविनाशिशब्दादिप्रकारकलौकिकप्रत्यक्षस्य त्वाचाद्यत्वाद्
तृतीयक्षणे निर्वाहः विशेषणज्ञानस्य हेतुतया तदुत्पत्तिक्षणेन द्विरहेण द्वितीयक्षणे न द्विशिष्टबुद्धिसंभवादि
त्यव्यनेन तदापि प्रत्यक्षत्वविशेषविषयस्य हेतुताया व्यवस्थापनीयतया यद्विशेषे यद्विशेषस्य प्रयोजकतान तत्सा
मान्येन तत्सामान्यस्येति नियमात् सामान्यकार्यकारणभावस्यावश्यकः तत्तद्विषयकेति तत्तद्व्यक्तिविषय
कप्रत्यक्षत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुतेत्यर्थः न चेदृशविशेषकार्यकारणभावो निःप्रमाणकप्र
वतत्तद्व्यक्तिविषयकप्रत्यक्षस्य संनिकर्षादिशालित्वनं तेष्विष्टत्वात् यावतीषु संनिकर्षादिघटितसामग्रीस
मवधाने युगपत्तावद्विषयकस्यैकस्यैव प्रत्यक्षस्योत्पत्तेरिति वाच्यं यत्तद्व्यक्तिभेदेनेंद्रियसंनिकर्षादिघटि
तसामग्रीभेदनिर्वाहाय तत्तद्व्यक्तित्वेन विषयहेतुताया आवश्यकत्वात् अन्यथा तत्तद्घटेंद्रियसन्निकर्षादीनां
साधारणधर्मस्य रक्तादेरेव हेतुतया तत्तद्व्यक्तिभासकसामग्र्या एतद्व्यक्तिभासकसामग्रीतो वैलक्षण्यासंभवा
त् तादृशहेतुतासत्वे तादृशसामग्र्याः पृथक् तत्तद्व्यक्तित्वावच्छिन्नघटितत्वेन वैलक्षण्यात् तद्वैलक्षण्ये
च तत्तद्व्यक्तिविषयकबाधग्रहाभावादिघटितायाः समवायेन तत्तद्व्यक्तिविषयकविशिष्टप्रत्यक्षसाम
ग्र्या विषयतासंबंधेन तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीमत्तत्क्षणवृत्तित्वविशिष्टायाः समवायेन तद्व्यक्तिविष
यकविशिष्टबुद्ध्युत्पादप्रयोजिका व्यक्त्यंतमात्रसंनिकर्षदशायामपि आत्मनि सत्वेन तदानीमात्मनि सम
वायेन तादृशबुद्ध्यापत्तेर्दुर्वारत्वात् न च सन्निकर्षस्यैव तत्तद्व्यक्तिसंनिकर्षत्वेन हेतुत्वमस्तु तावतापि अन्यव्य
क्तिमात्रवृत्तिसंनिकर्षवतिकाले विषयतया तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरहः स्फुट एव तदानीं तादृश

व्याप्तिसंनिकर्षत्वावच्छिन्नाभावादित्यवाच्यं गुरुणा तद्व्याप्तिसन्निकर्षत्वेन हेतुतापेक्षया लाघवात् तद्व्याप्तित्वे
न विषयहेतुताया एवौचितत्वात् न चोक्तकाले तत्तद्व्याप्तित्वावच्छिन्नस्य सत्वेन तद्घटितसामग्र्याः सत्वेन तन्नवि-
षयतायां तद्व्याप्तिप्रत्यक्षोत्पादकसामग्रीविरह इति विशिष्य विषयहेतुतयापि नोक्तातिप्रसंगवारणं संभव इ-
ति वाच्यं एकाधिकरणप्रत्यासत्त्वकारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वात् तादात्म्यसंबंधेन तत्त-
द्व्याप्तित्वावच्छिन्नसंबंधिन्यां तद्व्यक्तौ समवायादिना प्रत्यासत्तेरिंद्रियसंयोगादेः सत्वेपि उक्तसामग्रीविरहा-
त् यदि च तत्तद्धर्मघटितधर्मावच्छिन्नजनकसामग्री समवहिता कार्यं जनयति अत आत्मनि तद्व्याप्तिविषयका-
त्वरूपकार्यतावच्छेदकोपलक्षितप्रत्यक्षस्य समूहालंबनरूपस्य विषयतासंबंधेन व्यक्त्यंतरे उत्पन्नावपि त-
द्विशिष्टस्यानुत्पन्नेन तद्व्याप्तित्वावच्छिन्नहेतुतायां व्यभिचारः तादृशकार्यतावच्छेदकविशिष्टसमानाधि-
करणाभावघटितव्यापकतायाश्च तत्वात् तद्व्याप्तिवृत्तिविषयतात्वेनैव कार्यतावच्छेदकसंबंधत्वोपगमा-
त् न व्यभिचार इत्याहुः न च परामर्शत्व परामर्शप्रत्यक्षत्वयोर्वृत्तिसामान्याभावविशेषोक्तरूपबहिर्भावेप्य-
मध्यविधकार्यकारणभावः तेन रूपेणापीति शंकामपाकर्तुं मध्यविधकार्यकारणभावस्याप्रामाणिकत्वे तदव-
च्छेदकं विशिष्टत्वनामकं लघुरूपं दर्शयति कदाचिदिति तादृशकार्यकारणभावस्यानैकांतिकत्वे कदाचित्पदे-
न सूचितं यद्यपि अतींद्रियाणां गुरुत्वादृष्टभावनास्थितिस्थापकानां प्रत्यक्षस्य चक्षुरादियोग्यस्पर्शादीनां
चक्षुरादिनाग्रहणस्य च वारणाय योग्यजातीयानां विषयप्रत्यक्षे हेतुत्वकल्पनमावश्यकं तथा सति यावद्वि-
शेषकारणबाधेनातींद्रियविषयतया प्रत्यक्षवारणसंभवात् तथाप्यादिपदग्राह्यचक्षुरादिप्रत्यक्षे चक्षुत्वादिना
कार्यकारणभावो नैयंत्रिक एव वस्तुतस्त्वतींद्रियविषयाणां तादात्म्येन प्रतिबंधकत्वकल्पनेनैवातिप्रसंगवा-

गदा०

21

रणयोरप्रजातीयानां बहूनां न प्रत्यक्षहेतुता अन्यतमत्वं च यथमूहनीयं इदानीं प्रतिज्ञादिप्रदर्शी प्रत्यक्षे परामर्शत्वेन
हेतुतां निराकरोति नहीति तन्नाड्डिनरत्वादिरिति व्याप्तिप्रकारकत्वपक्षधर्मताविषयकत्वज्ञानत्वसंश
येतरत्वादिघटितेत्यर्थः घटत्तद्विषयत्वादिना घटत्वतत्प्रकारकप्रत्यक्षत्वादिना ननु हेतुत्वस्य प्रामाणि
कगौरवं न दोषायेत्यत आह मानाभावादिति ननु परामर्शादिशून्यकाले तद्विषयकाले न तद्विषयकप्रत्यक्ष-
त्वावच्छिन्नापत्तिवारणाय अन्यथानुपपत्त्या परामर्शादिप्रत्यक्षे परामर्शत्वादिना कारणत्वकल्पनमावश्य
कमत आह अन्यथोपपत्तेरिति प्रत्यक्षविषयताप्रयोजिकाया विषयतासंबन्धेन प्रत्यक्षोत्पादकसामग्र्या वि
षयनिष्ठतद्धर्मसामानाधिकरण्यरूपायाः प्रत्यक्षविषयतायास्तत्तद्धर्मसामानाधिकरण्यप्रयोजकादेव तन्नह्
निविषयताकप्रत्यक्षत्वावच्छिन्नोत्पत्तिनियमोपपत्तेरित्यर्थः अत एव प्रयोजकसमाजनिश्चयस्य धर्मान्तरगणा-
मपि न कार्यतावच्छेदकत्वमिति भावः वह्निव्याप्यधूमवान् पर्वत इति स्मरणेनाहृशानिश्चयत्वेन हेतुत्वान्नव्या ११
प्तिर्व्याप्तिरिति शंकते अथेति विशिष्टस्मरणे व्याप्यविशिष्टपक्षस्मरणेन च स्मृतिजनकतायामप्रामाण्य-
ज्ञानाभाववैशिष्ट्यानिवेशादनुमितौ च तन्निवेशान्नैकरूपेणोभयत्र हेतुतेति नातिव्याप्तिरिति वाच्यं अनुमि
तिजनकतायामप्रामाण्यज्ञानाभावनिवेशो विशेष्यविशेषणभावे विनिगमनाविरहात् प्रामाण्यज्ञानाभावस्य
पृथक्कारणत्वोपगमात् अथ धूमत्वादिना पक्षधूमादिविषयकज्ञानात्तेन रूपेण धूमाद्यन्तरस्मरणवारणाय
तत्तद्धूमादिव्यक्त्यवगाहित्वमपि स्मृतिजनकतावच्छेदके प्रविष्टं न तत्त्वनुमितिजनकतायामिति कथमवच्छेदक-
तापर्याप्तिघटितलक्षणे नातिव्याप्तिः न च पर्याप्त्यनिवेशाभिप्रायेणैवेदमभिधानं न चोपेनान्यत्वेनेति शंका
नवतारात् समानविशेष्यताप्रत्यासत्त्यैवानतिप्रसंगात् तत्र द्व्यादिविषयकत्वस्य स्मृतिजनकतायां न निवेश इति

वाच्यं वह्निव्याप्यधूमत्वादिनाऽन्यविषयकानुभवान्तरेण चैतद्धूमावगाहिज्ञानात् वह्निव्याप्यधूमत्वादिनैतद्धू
मादिविषयकस्मरणस्य समानविशेष्यताप्रत्यासत्त्या वारणात् वह्निव्याप्यधूमत्वादिमैतद्धूमादिविषयकस्मरण
स्य समानविशेष्यताप्रत्यासत्त्या प्रकारकविषयतात्वेन विषयतायाः कार्यकारणसंबंधत्वोपगमे कारणतावच्छेद
कधर्मगर्भव्याप्त्यादिविषयतानिवेशप्रयोजनविरहेण तत्तद्रूपावच्छिन्नजनकताघटितोक्तलक्षणस्यातिर
व्याप्त्यनवकाशात् ज्ञानविषयतायाः संबंधत्वेऽपि अभावत्वादिनाऽभावान्तरस्य व्याप्तिशरीरे यत्राभाने तत्रा
परा भावादिविषयकस्मरणापत्तिर्दुर्वारैवेति तत्तद्व्यक्तिविषयतात्वेनैवाभावत्वाद्यवच्छिन्नविषयतास्मृतिज
नकतायां निवेशनीया न त्वन्यमिति जनकतायामित्यतिव्याप्तिर्न संगतैवेति चेन्न यत्साध्यव्याप्यहेतु
विशिष्टपक्षधर्मिविषयकं सर्वमेव ज्ञानं तद्धर्मप्रकारेण तद्धर्मीऽप्यशेषव्यक्तिविषयकं तत्साध्यव्याप्यतद्धेतु
विशिष्टतद्धर्मिकज्ञानस्य तादृशस्मृतिहेतुतायां तद्धर्मिविषयकत्वस्याव्यावर्तकत्वेनानिवेशा
त् तादृशपरामर्शहेतुताघटितलक्षणाभिप्रायेणैवैतदतिव्याप्तेरभिमानात् जातिघटितलक्षणे सदा
नीमकरणात् अथ तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन हेतुतयैव स्मृतेर्विषयनियमे ज्ञानस्मृता
नत्वेनैव स्मृतित्वावच्छिन्नं प्रति हेतुता न तु तत्तद्विषयकस्मृतौ तद्विषयत्वे हेतुत्वमावश्यकमिति वाच्यं संस्का
रस्य तद्धर्मिकतद्धर्मप्रकारकस्मरणे तद्धर्मितदभावप्रकारकान्यतद्धर्मिकतत्प्रकारकसंस्कारत्वेन हेतु
तयैव तद्धर्मोचरसंशयानन्तरस्मरणायत्ययोगात् संशयजन्यसंस्कारस्याविरोधिप्रकारकत्वनियमादिति चेन्न
संस्कारस्य संस्कारत्वेनैव हेतुताज्ञानस्य तु न तद्धर्मोचरस्य तु तद्धर्मोचरस्मृतौ न नियतत्वेन इत्यस्य संबंधेन विनिग
मकाभावात् ज्ञानहेतुतायामपि विषयादिनिवेशस्य प्रत्याख्येयत्वात् न च न तद्धर्मोचरज्ञानजन्यस्य संस्का

ग.दा.

२२

तस्य कालादिना नाशे अन्यगोचरसंस्कारजतज्ज्ञोचरस्मरणवारणाय संस्कारहेतुतायां विषयनिवेशनमा
वश्यकमिति वाच्यं संस्कारहेतुतायां विषयानिवेशे प्रमुक्तस्थले तन्निरूपद्रूपकारणव्यापारविरहेण तत्स्म
रणापत्त्यसंभवात् वस्तुतोऽन्वयव्यतिरेकाभ्यां तज्ज्ञोचरस्मृतौ तज्ज्ञोचरनिरूपयत्वेन हेतुत्वसिद्धौ तन्निर्वा
हकतया व्यापारीभूतसंस्कारकल्पना संस्कारे प्रमाणान्तराभावादिति कथं कारणेन तज्ज्ञोचरनिरूपयत्वा
वच्छिन्नस्यान्यथासिद्धिर्यतः तद्रूपावच्छिन्नमहेतुः स्यात् नहि यद्रूपजीव्ययतां सिद्ध्यति तत्तद्रूपघातकं ए
तेन संस्कारहेतुतायां विषयाविषयानिवेशे तद्दोषोपेक्षात्मकज्ञानजन्यादन्यगोचरसंस्काराज्ज्ञातस्मर
णापत्तिवारणाय तज्ज्ञाद्विषयकस्मृतौ तज्ज्ञाद्विषयसंस्कारत्वेन हेतुत्वमावश्यकमिति ज्ञानहेतुतायां वि
षयनिवेशो व्यर्थ इत्यपि प्रत्युक्तं फलव्यापारैप्रतिकरणस्यैकेनैव रूपेण हेतुतेति प्राचीनसंमतनिय
मानुरोधेन ज्ञानस्य स्मृतिजनकतायां विषयनिवेशनमावश्यकमित्यपि वदन्ति यत्तु ज्ञानस्य ज्ञानत्वेनैव
स्मृतिहेतुता तद्विषयकस्मृतावुद्बोधकविशेषाणां हेतुताया आवश्यकत्वात्तत एव विषयनियमोपप
त्तेः उद्बोधकानां फलबलकल्प्यत्वात् न च संबंधिपदज्ञानादीनामनुगतरूपेणैव तज्ज्ञोचरस्मृतिहे
तुतया तज्ज्ञोचरज्ञानं विनापि तत्स्मरणापत्तिर्वाच्यं तत्संबंधित्वेन गृहीते यत्र ज्ञानस्यैव तद्विषय
स्मारकतया तादृशोद्बोधकसमवधानस्थले तज्ज्ञानस्यावश्यकत्वादिति तदसत् तथा सति ज्ञान
त्वमात्रेण ज्ञानस्य स्मृतिहेतुतायामप्रामाणिकत्वापत्तेः उद्बोधकेन ज्ञानविशेषान्यथासिद्धौ का
लान्तरे यज्ज्ञानस्योपयोगिता तज्ज्ञानार्थविशेषघटितेनापास्त्राध्ययनादावप्रवृत्तिप्रसंगाच्च वस्तुतः
स्मृतौ संबंधिज्ञानस्य तत्संबंधावगाहित्वेन हेतुतायामत्र संबंधो येन रूपेण गृहीतः संबंधविषयका

रूपितत्प्रकारकज्ञानात् संबंधं तरस्मरणात् नापि संबंधग्रहविषयतावच्छेदकावच्छिन्नविषयकत्वेन संबंध
ग्रहस्योपलक्षणतयाभावि संबंधग्रहविषयकज्ञानस्याप्युद्बोधकतायतः संबंधग्रहे सामान्यतः पूर्वत्वमेव व्याव
र्तकेन ज्ञानपूर्वत्वं चानुगतं संबंधानुद्बोधे च पूर्वं संबंधग्रहोप्यस्मारकः संबंधोद्बोधका अननुगतापवर्गे
च स्मरत्वप्रयोजकसंबंधिज्ञानानां तत्तद्व्यक्तित्वेनैव हेतुतावाच्यात यथाचयादृशसंबंधिज्ञानसत्त्वे यस्योद्बोधो नि
यमतोऽनुभूतस्य यद्विषयकस्मृतिः तत्तद्व्यक्तिज्ञानस्य तत्तद्व्यक्तित्वेन नानाहेतुत्वकल्पनामपेक्ष्य तत्तद्रूपीयत
द्विषयकस्मृतौ तद्व्यक्तिज्ञानत्वेनानुगतरूपेणैकहेतुतैव कल्प्यात् तत्पूर्वं च तद्विषयस्य नानुभवस्तत्कालीना
तद्व्यक्तिज्ञानानन्यस्य तद्विषयकस्मृतिवारणाय तद्बोधरस्मृतौ तद्विषयकानिष्पन्नत्वेनापि हेतुत्वमावश्यकमिति
कृ उपेक्षाज्ञानात् स्मरणानुत्पत्त्या जन्यत्वस्याप्यधिकस्य स्मृतिकारणतावच्छेदके निवेशनतयानोपदर्शितनि
श्चियत्वपर्यायमकारणतावच्छेदकताकत्वं स्मृतावितिनातिव्याप्तिरितिशंकानिरस्ता तिन चेति उपेक्षान्यत्वं उप
क्षात्वावच्छिन्नभेदः तस्यतद्वास्मृतिकारणतावच्छेदकघटकतास्यात् यदुपेक्षात्वस्मृतिजनकधीव्यावृत्तो जा
तिविशेषः स्यात् स्मृत्यजनकज्ञानत्वरूपस्योपेक्षात्वव्यवहारविषयस्येत्यादेः स्मृतिजनकतायां प्रवेशासंभवात्
स्मृत्यजनकान्यत्वस्य स्मृतिजनकत्वरूपत्वात् स्वस्य च स्वानवच्छेदकत्वात् न हि तादृशाजातिः शाक्यकल्पना
जातिसंकरादिदोषग्रासादित्याह उपेक्षात्वंहीति अत्र च जातित्वाभावानुमाने उपेक्षात्वस्य स्मृतिजनकताव
च्छेदकभेदप्रतियोगितावच्छेदकत्वेन पक्षता अथैत्यादिशंकितुमतेपि स्मृतिजनकतावच्छेदकभेदप्रति
योगितावच्छेदकत्वस्य संशयत्वे तद्भेदकविरोधिप्रकारकत्वस्य वाप्रसिद्धत्वात् तत्र जातित्वाभावस्योभयम
तसिद्धत्वेपि उक्तपक्षतावच्छेदकावच्छेदेन साध्यसिद्धे तद्रूपपक्षत्वान्नांशतः सिद्धसाधनं दोषः अत्रोपेक्षापरमह

गदा॰

२३

त्तिनिमित्तत्वेन पक्षता उपेक्षापदप्रवृत्तिनिमित्तस्य प्रसिद्धावपि वादिनः तस्य स्मृत्यजनकत्वादिरूपतया न तदव
च्छिन्नान्यत्वस्य स्मृतिजनकतावच्छेदकत्वासंभवेन स्मृतेरनुमितिजनकतावच्छेदकपर्याप्तजनकतावच्छेद
कतागतत्वापत्तेः अत्राप्यवच्छेदकावच्छेदेन साध्यासिद्धेरुद्देश्यत्वान्नोक्तदोष इत्यपि कश्चित् तच्चिन्त्यं उपेक्षा
त्वस्य जातित्वेनादिनातस्य उपेक्षापदप्रवृत्तिनिमित्तत्वानभ्युपगमेपि तन्निर्वाहात् अवच्छेदकावच्छेदे
न साध्यासिद्धेरुद्देश्यत्वेपि तत्र जातित्वाभावासिद्धेः तादृशादपि स्मृत्यनुत्पादाद्वेत्यग्रिमग्रन्थासंगतेश्च न
रूपवतः स्मृत्युत्पादकत्वेन तद्रूपनिष्ठस्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकताया एव विवक्षि
तत्वात् न तु उपेक्षापदप्रवृत्तिनिमित्ततायाः इति यत्तु स्मृतिजनकावृत्तिज्ञानधर्मत्वेन पक्षतानां तादृशधर्म
त्वं च तत्तज्ज्ञानान्यतरत्वादेः प्रसिद्धमिति तदसत् एकांशे उपेक्षात्मकज्ञानस्याप्यन्यस्मृतिजनकतया उपे ११
क्षात्वस्य स्मृतिजनकावृत्तित्वासिद्धेः अन्यथा अंशिकत्वोपगमाच्चेति वाधकासंगतेः स्वीययावद्वि
षयकस्मृतिजनकावृत्तिज्ञानधर्मत्वेन तु पक्षत्वं संभवति चाक्षुषत्वादिनेति प्राहिनाज्ञानत्वव्याप्यत्ति
खिलजातिपरिग्रहः तत्तज्जातिनिरूपितसंकरस्य च पृथगेव हेतुताबोधकतत्तमिलितस्यैवैयर्थ्यात् त
ज्जात्यव्यापकत्वे सति तज्जातिव्यभिचारित्वे सति तज्जातिसामानाधिकरण्यं तत्संकरः अव्यापकत्वं प्रतियो
ग्यसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वं तज्जातिव्यभिचारित्वं च तज्जातिव्यक्तित्वावच्छिन्नप्रतियो
गिताकतदभावसामानाधिकरण्यं यद्यपि व्याप्यजातिमत्यपि कालिकादिसंबंधेन व्यापकजात्यवच्छिन्न
स्य भेदो वर्तते व्याप्यजातेरपि व्यापकजातिशून्ये कालिकसंबंधेन वृत्तेर्वि तद्जातेरपि कालिकसंबंधेन
सामानाधिकरण्यमस्ति समवायेन वावच्छेदकत्वे वृत्तिश्च पदस्यापेक्षात्वस्य नोभयमते उपेक्षात्वस्य उभा

पितामते विशेषणताविशेषेणैव वृत्तेरिति स्वरूपासिद्ध्यापत्तिः वस्तुतस्तु गुणगतजातिसंकरस्य यत्र हेतुता
तत्र साधनाप्रसिद्धिरेव गुणे जातिभिन्नस्यासमवायात् समवायघटितचालनघटत्वादिसंकरस्य क्वापि सर्वस्यापि प्रसिद्धि
विरहात् तथापि समवायेन स्वाश्रयविशेषणतान्यतरसंबंधेन तथात्वे बोध्यं अथवा समवायावच्छेदकतास्थाने
समवायावच्छिन्नावच्छेदकतादृशत्वं यत्समवेतं तत्समवेतत्वेन जातिसमानाधिकरणत्वस्थाने च तज्जातिमत्समवे
न्या०४ वेतत्वेन यत्समवेतं तत्समवेतत्वं च निवेशनीयमिति नासिद्धिः विशिष्टभेदस्य च तत्समवेतत्वेऽसमवेतत्वेऽपि तत्त्वा
त् यदि चैतन्निरूपकजातिभेदेन भिन्नमेव तज्जातिभेदेन भिन्नमेव तज्जातिना विशिष्यैवोपादानादिति चालनघटत्वादि
रिव चालनघटत्वाद्यव्यापकतत्समानाधिकरणस्य उपेक्षात्वस्याधिकजातित्वं स्यादित्यप्रयोजकत्वशंकायामसङ्ग
च्छ्यते तदा यज्जात्यव्यापकत्वे सति यज्जातिव्यभिचारि यन्न जातिसमानाधिकरणजातित्वमिति सामान्यतो व्याप्या
उपेक्षातेन चालनघटत्वादिसमानाधिकरणजातित्वाभावः साध्यः चालनघटत्वादिव्यापकज्ञानत्वादौ ज्ञानत्वादि
व्याप्यचालनघटत्वादौ च व्यभिचारवारणाय दलद्वयं वस्तुतस्तु व्याप्यस्वव्यभिचारवारणाय दलद्वयं वस्तुतस्तु स्वाव्या
प्यस्वव्यभिचारिजातित्वव्यापकविरोधप्रतियोगितायत्त्वं तन्नाच्छेदकघटं हेतुं कृत्वा उपेक्षात्वादौ जातिसंकीर्णत्व
मे जातित्वाभावः साधनीयः उपेक्षात्वाद्यव्यापकतद्व्यभिचारिचालनघटत्वादिजातौ तद्विरोधित्वासत्त्वेनोपेक्षात्वादे
र्निराकारस्वानन्तर्भावात्तत्र तादृशभेदकूटस्योभयवादिसिद्धत्वात् न च सत्तादिव्यभिचारिजातेरप्रसिद्ध्या न तादृशांशस्व
सत्तेति तत्र व्यभिचार इति वाच्यं अपरजातित्वाभावस्यैव साध्यत्वोपगमात्तत्र तादृशसाध्यसत्त्वेन व्यभिचारान
वकाशात् यत्र च तत्त्वघटत्वादितज्जात्यन्तरेण संकरस्य जातित्वे बाधकता यथा प्राचां भूतत्वमूर्तत्वयोः पर
स्परं संकरे सा च जातित्वविघटने तत्र जातिसंकरहेतोरसिद्धेस्तथापि व्याप्यव्यापकभावानापन्नसमानाधिकरण्ये सा

गदा०

२६

धर्मीयं विनिगमनाविरहेणोभयत्रजातित्वाऽभावपर्यवसानमितिकृतमतिविस्तरेण ननु चाक्षुषत्वादिव्याप्यमुपे
क्षात्वं नानैव स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकमुपगन्तव्यं भेदकूटस्य कारणतावच्छेदकत्वे वाध
काभावात् तथा च न जातिसंकर इत्यापत्त्यवाधकान्तरमाह सांशिकात्वेति यत्र समूहालंबनज्ञानस्यैक
विषयस्मारकत्वमपरविषयास्मारकत्वं तत्रोपेक्षात्वजात्यनभ्युपगमे सकलविषयस्मारकत्वं तदभ्युपगमे वस
कलविषयास्मारकत्वं स्यादिति यस्य यद्विषयास्मारकत्वं तस्य तद्विषयावच्छेदेनोपेक्षात्वं स्वीकरणीय
मन्यविषयांशे तदभावः तद्विषयकस्मृतौ तद्विषयावच्छिन्नमुपेक्षान्यत्वं प्रयोजकं वाच्यमित्यव्याप्यवृत्तित्वा
दुपेक्षात्वेन जातिरित्यर्थः न चांशिकोपेक्षायामपि न विषयान्तरावच्छेदेनोपेक्षात्वाभावः स्वीक्रियते किंतु त
द्विषयकत्वस्योपेक्षात्वानवच्छेदकत्वमात्रं प्रतियोग्यनवच्छेदकस्यैवाभावावच्छेदकत्वनियमात् तथा निय
मे दण्डादेर्द्रव्यत्वादिना घटादिजनकत्वाभावप्रसंगादिति नोपेक्षात्वस्याव्याप्यवृत्तित्वं स्वाभावसामानाधि
करण्यादि वाच्यं जातेः स्वाभावसामानाधिकरण्यवत् किंचिदवच्छिन्नवृत्तिकतायामपि सिद्धान्तविरुद्धत्वा ५४
त् यद्यपि उपेक्षात्वस्य स्मृत्यजनकत्वरूपोपाधित्वमनेन स्वाभावसामानाधिकरण्यमवच्छिन्नवृत्तिकत्वं चेति ना
यमुभयसिद्धो हेतुः तथापि तन्मते न सिद्धहेतुनैव तं प्रति जातित्वाभावः साध्यते अत एवोपगमादित्यग्रे वक्तृ
त्वप्रमेयत्वादिनांशिकत्वजातित्वोभयाभावः साधनीयः उपेक्षान्यत्वेत्यप्रतिहेतुतावादिना च तत्सांशिका
त्वोपगमाज्जातित्वाभावमाहाय पर्यवसानमित्यांशिकात्वोपगमाच्चेत्यनेन दूषितं ननु माभूदुपेक्षात्वं जातिः त
ज्ज्ञोत्तरप्रयत्नाजनकत्वरूपोपाधिरेव तद्विषयतदुपेक्षात्वं जातिः तज्ज्ञोत्तरप्रयत्नाजनकत्वरूपेण उपादानभिन्न
ज्ञाने उपेक्षाव्यवहारात् तदवच्छिन्नान्यत्वमेव तद्विषयकस्मृतिप्रयोजकं वाच्यं अत एवैकज्ञानस्य किंचिद्वि

षयस्मारकत्वे किंचिद्विषयास्मारकत्वं चोपपद्यते निरुक्तोपेक्षात्वस्य विषयभेदनियंत्रितत्वात् अथवा स्वस
मानाधिकरणतद्विषयाजिज्ञासाजनकत्वेनादित्याशंकानिराकरोति नापीति अप्रवृत्तिनिवृत्त्यजनकत्वमिति प्र
ति प्रयोजकभेदप्रतियोगितावच्छेदकमुपेक्षात्वमित्यनुपपद्यते ताद्रूप्याविरिति तथाचोक्तरूपयोर्निरुक्तोपे
क्षात्वरूपत्वेनाद्रूपयोः स्मृत्यनुत्पादकता न स्यादितिभावः नन्पेक्षाज्ञानात् संस्कारानुत्पादेन तद्विषयसं
स्कारजनकता न स्यादितिभावः नन्पेक्षाज्ञानात् संस्कारानुत्पादेन तद्विषयसंस्कारजनकत्वरूपोपेक्षा
त्वावच्छिन्नभेदस्तत्संस्कारजनकत्वपर्यवसितः तत्स्मृतिजनकतावच्छेदकोपाध्य इत्याशंकानिरस्यति नापी
ति तज्जनकतावच्छेदकेति संस्कारे प्रति उपेक्षासाधारणरूपेणानिश्चयत्वमात्रेणहेतुत्वे उपेक्षायाः संस्कारज
नकत्वं दुर्घटमिति संस्कारजनकत्वस्य तद्वैवोपेक्षात्वरूपता संभवति यावदुपेक्षाव्याप्तरूपेण संस्कारज
नकतास्यान्नाद्रूप्येण चेद्रूपमुपेक्षात्वनिश्चयत्वादन्यत् दुर्वचमतः संस्कारवत्यपि उपेक्षान्यत्वेन हेतुतावाच्या
ईदृश्योपेक्षात्वस्य संस्कारजनकत्वरूपत्वे आत्माश्रयः स्मृत्यजनकत्वरूपत्वे च संस्कारं प्रति स्मृतिजनकत्वे
न स्मृतिं प्रति च संस्कारजनकत्वेन कत्वेन हेतुत्वेत्यन्योन्याश्रयः इति न पुनरुक्तमित्यर्थः ननु संस्कारजनक
तावच्छेदकस्य उपेक्षासाधारणोपि उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन संस्कारप्रतिबंधकत्वोपगमात् तासां संस्का
रानुपधायकत्वनिर्वाहः आंशिकोपेक्षाव्यक्तीनां तद्विषयकसंस्कारत्वमेव प्रतिबध्यतावच्छेदकमिति ना
सामान्यविषयकसंस्कारोपधायकतया अन्यविषयस्मारकतोपपत्तिरित्यत आह संस्कारेति यत्तज्जनकत
द्व्यक्तित्वेनैव उपेक्षाव्यक्तीनां भेदाः संस्कारजनकतावच्छेदकाः न चैवं भेदस्तद्व्यक्तिविशेष्यविशेषणभावे
विनिगमनाविरहः एकैकभेदं पृथक्पृथक् निवेश्य एकैककारणताभ्युपगमात् एकोपेक्षाज्ञानव्यक्तिदृष्टा

गदा

25

यांश्चान्योपेक्षात्वव्यक्तिभिन्नज्ञानसत्वेपि तदुपेक्षात्वव्यक्तिभिन्नज्ञानरूपकारणविरहेण संस्कारानुत्पादसंभवात्
नचोपेक्षाद्वयसत्वे सकलकारणसत्वात् संस्कारापत्तिः तद्वारणाय तादृशव्यक्तिभेदद्वयस्यैकत्र निवेशपत्ता
त् तयोर्भेदयोर्विशेष्यविशेषणभावे विनिगमनाविरहात् कारणताद्वयमिष्टमेव उपेक्षाव्यक्तीनां तत्तद्व्यक्ति
त्वेन प्रतिबंधकतामतेपि तत्कालीनसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबंधकतायां गौरवात् एवं
च संस्काराननुधायकत्वरूपोपेक्षात्वावच्छिन्नभेदस्य स्मृतिजनकतावच्छेदकत्वेपि नान्योन्याश्रयः इत्यतः सं
स्कारेतीत्यवतारणमसत् तत्तदुपेक्षान्यत्वेन कारणतामतेपि तेन रूपेण ज्ञानस्य संस्कारहेतुता न तदुपे
क्षाकालीनसंयोगादिव्यक्तेर्वा न तत्प्रतिबंधकता कल्प्यते इत्यनुयोगस्याऽशंकासमाधानत्वात् संस्कारा
नुत्पत्तेर्वेत्यस्य उपेक्षाज्ञानादित्यादि संस्कारजनकत्वस्य तद्वोपेक्षात्वरूपतासंभवो यदि उपेक्षाधीः संस्का
रं न जनयेत् तथा सति संस्काररूपव्यापारविरहेणैव उपेक्षाया अस्मारकत्वसंभवे उपेक्षात्वस्य संस्कारजनक २५
स्य स्मृतिनिर्वचनत्वेपि तदवच्छिन्नासत्वस्य निष्प्रयोजनकतया स्मृतिजनकतावच्छेदकगर्भेऽनिवेशादित्यर्थः तथा
च विशिष्य स्मरणातिव्याप्तिर्दुर्वारैवेति भावः नच तद्विषयकस्मरणे तद्विषयकसंस्काररूपव्यापारेणान्यथात
द्विषयकालीनत्वावच्छिन्नस्य नान्यथासिद्धिः तथा उपेक्षान्यत्वसहिततद्रूपावच्छिन्नस्यापीति तेन रूपेण स्म
रतिहेतुता दुर्वारैवेति वाच्यं संस्कारासिद्धौ संस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदघटितधर्मपुरस्का
रेण कार्यकारणभावकल्पनासंभवात् तादृशधर्मावच्छिन्नकारणतायाः संस्काररूपव्यापारसिद्धाव
नुपजीव्यतया तेन तद्रूपावच्छिन्नायामन्यथासिद्ध्यनुपजीव्यविरोधरूपबाधकानवकाशात् यत्तु न तूपेक्षा
त्वस्यानुगतस्य निर्वचनासंभवेपि उपेक्षाज्ञानात्स्मरणानुत्पत्तौ तदुपेक्षाव्यक्तिभिन्नत्वेनैवानुगत्या स्मृति

हेतुत्वमुपेयं तथा च निर्विशिष्टस्मरणं प्रति व्याप्तिरित्यत आह संस्कारानुत्पत्त्यैवेति इत्थं च तादृशोपेक्षाज्ञानात्
संस्कारो नोपगम्यते गौरवात् तन्निर्वाहाय संस्कारजनकतायामुपेक्षाभेदनिवेशस्यावश्यकत्वे स्मृतिजनकता
यां न तन्निवेशः संस्काराभावेनैवोपेक्षात्वस्मरणोपपत्तेः नचैवं फलव्यापारौ प्रति कारणस्यैकरूपेण हेतुत्वे
ति नियमपरित्यागो निश्चयत्वमपि संस्कारजनकतायामेव विनिगमनाविरहेण निविशतां न तथा च कथमिति व्या
प्तिरिति वाच्यं संस्कारजनकतायां निश्चयत्वनिवेशस्योपेक्षान्यत्वेन सह विशेषणविशेष्यभावे विनिग
मनाविरहेण स्मृतिजनकतायामेव निश्चयत्वनिवेशौचित्यात् संशयाद्यधर्मिगोचरसंस्कारस्यावश्यकत
या निश्चयत्वेन विशिष्टसंस्कारहेतुत्वे संशयजन्यसंस्कारे विशिष्टविषयकत्वमात्रकल्पने उपेक्षान्यत्वे
न तद्धेतुत्वे च विशिष्टविषयकसंस्कारत्वरूपधर्मकल्पनमिति विनिगमनाविरहेण वैपरीत्यप्रसक्तिः व
स्तुतस्तु उपेक्षाज्ञानानां संस्कारप्रतिबन्धकत्वमेवोपेयं तथा च फलव्यापारौ प्रति कारणस्यैकरूपेण
हेतुत्वनियमात् उभयत्रैव निश्चयत्वप्रवेशः एतेनांशिकोपेक्षाज्ञानात्तदन्यविषयकसंस्कारस्य प्रामाणि
कत्वयात्तद्भेदः स्मृतिजनकतायामेव निवेश्यं ते न तु संस्कारजनकतायां तथा सति तद्विशेषोपेक्षाभेदः सह
विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताबाहुल्यप्रसंगादिति निश्चयत्वं संस्कारजनकतायाम
वनिवेश्यं स्मृतिजनकतायां तन्निवेशोपि स्यांशिकोपेक्षाभेदः सह विशेषणविशेष्यभावे विनिगमनावि
रहतादवस्थ्यादित्यपास्तं तथा च विशिष्टस्मरणानिव्याप्तिः स्यादेवेति व्याख्यानं न दूषणं तत्र व्यापृतासि
द्धिदृशायां कल्पनीयस्य तत्र उपेक्षान्यत्वेन स्मृतिहेतुत्वस्य उत्तरकालकल्प्यव्यापारविरहेण कार्यानिप्रसंगवा
रणसंभवेपि निराकरणासंभवात् तृतीयशंकायां संस्कारानुत्पत्त्यैवेत्यादि फक्किकावतरणासंगतेः ननु तद्विषयक

गदा स्मृतौ तद्विषयकज्ञानत्वेन न हेतुता अपि तु तद्विषयकानुभवत्वेन न हेतुता अपि तु तद्विषयकानुभवत्वेन न अ-
नुभवत्वस्यापि जातित्वेन त्वापेक्षया गौरवाभावात् स्मृत्यन्तरमपि पूर्वानुभवादेव स्मरणोपपत्तेः स्मृतेः
26 स्मृतिहेतुतायाश्च प्रामाणिकत्वात् तथा च न ज्ञानत्वघटितधर्मावच्छिन्नकारणत्वाघटितानुमितिलक्ष-
णस्याविशिष्टस्मृतावतिव्याप्तिः न चानुभवत्वापेक्षया अग्रहणाज्ञानत्वेनापि स्मृतिहेतुताया विनिगम-
नाविरहेण उभयोरेव तया तादृशकारणतामादाय अतिव्याप्तिर्दुर्वारैवेति वाच्यं अग्रहव्याप्यधर्मपुरस्कारेण
कारणत्वसंभवे व्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वादिति शंकां निरस्यति नाप्यनुभवत्वेनेति सं-
स्कारस्य फलनाश्यतया स्वजन्यस्मृतिनाश्यतया प्रथमस्मरणेनैव पूर्वानुभवजन्यसंस्कारनाशे सत्यनु-
नुभूतस्य स्मरणान्तरम् अननुभूतस्याविषयस्य स्मरणान्तरं अनुभवरूपकारणव्यापाराभावत्वेनास्मरणप्रसं-
गात् स्मरणान्तरानुपपत्तेरित्यर्थः ननु स्वजन्यस्मरणस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन
स्मृतिहेतुत्वेपि घटपटादिरूपनानाविषयावगाहिना अनुभवेन जनितस्य तावद्विषयसंस्कारस्य घ-
टाद्येकैकगोचरस्मरणेनापि विनाशात् तदुत्तरं घटादिस्मरणानुपपत्तिस्तद्विषयकसंस्काराभावात् स्मृतिज-
न्यघटादिगोचरसंस्कारस्य च भिन्नविषयतया पटादिस्मारकत्वायोगादित्याशंकां निरस्यति समानेति समा-
नाकारस्य अनन्याकारस्य अतः प्रत्येकगोचरनानासंस्कारजनितसमूहालंबनस्मरणेन स्वजनकसकल-
संस्कारनाशनिर्वाहः अथा च नाशकता यदि स्वजन्यसकलविषयकस्मृतित्वेन तदा स्वपदस्य तत्तत्संस्कार-
व्यक्तिपरतया आवश्यकत्वात्तत्तद्व्यक्तिभेदेन कारणताबाहुल्यं तदुपगमे तत्तद्व्यक्तित्वेनैव नाशकतायाः
यकत्वात् यदि च प्रतियोगितासंबंधेन संस्कारनाशं प्रति जनकत्वानतिरिक्तविषयकत्वोभयसंबंधेन स्म

त्तित्वेन हेतुताज्जनकत्वनिवेशात्तत्त्वजन्यसंस्कारस्य स्मरत्वान विनाशः जनकत्वस्थाने तद्घटकं पूर्ववर्त्ति-
त्वमेव वा निवेश्यं न च व्यधिकरणस्मृतेरपि नाशकतापत्तिः व्यधिकरणस्मृतिं प्रत्यपि संस्कारस्य स्वरूपयो-
ग्यतया सामानाधिकरण्यनिवेशस्योभयमतेऽप्यावश्यकत्वात् नियमाननुपपत्त्या सिद्धत्वप्रवेशवैफल्यात् वस्तु-
तः सामानाधिकरण्यसहितमनतिरिक्तविषयकत्वमेव संबंधः न तु जनकत्वस्य पूर्वकालीनत्वस्य वा निवेशः
ज्ञानादीनां क्षणिकत्वतावारणाय प्रतियोगितासंबंधेन नाशं प्रति पूर्वत्वसंबंधेन नाशस्य सामान्यकारणता-
योऽप्यावश्यकत्वान्न तथैव स्वजनकस्मरणेन संस्कारस्य स्वोत्पत्तिद्वितीयक्षणे नाशापत्त्यनवकाशात् न तदानीं च-
स्मृतेर्विनाशे न ततः तदुत्तरक्षणेऽपि तन्नाशापत्त्यसंभवात् अनतिरिक्तविषयकत्वं च स्वानुभूतिविषयकस्मरणं-
तद्घट इत्यादिज्ञानजन्यसंस्कारनाशायतेस्त्वेतस्य व्यतेतथापि संबंधमध्ये तत्तत्स्मरणव्यक्तिरूपस्वपदार्थमनन्तर्भा-
व्यश्चानतिरिक्तविषयकत्वेन स्वानुभूतिविषयतायाश्च प्रसिद्धदुर्निर्वचत्वेन तत्तद्व्यक्तिविश्रामस्यावश्यकत्वात्
स्वनिष्ठभेदप्रतियोगितावच्छेदकाविषयिताशून्यत्वरूपानतिरिक्तविषयकत्वेऽपि भेदे तत्तत्स्मृतिव्यक्तिनिष्ठत्व-
निवेशनमावश्यकं अन्यथावच्छेदकत्वान्नस्य विषयितायामव्यावर्तकतापत्तेरिति चेत् सत्यं तत्प्रकारकतद्वि-
शेष्यकसंस्कारनाशं प्रति तत्प्रकारकतद्विशेष्यकस्मृतित्वेन कारणता कार्यस्य संबंधः प्रतियोगिता कारणस्य
पूर्ववर्त्तित्वसहितं तत्सहितत्वसामानाधिकरण्यं तत्तद्विषयकान्यनाशं प्रति तद्विषयकसंस्कारभेदोऽपि प्रति-
योगिप्रत्यासत्त्या हेतुः अतो घटत्वप्रकारकघटविशेष्यकसमूहालंबनात्मकस्मृत्या यथा समूहालंबना-
त्मकेऽपि तादृशसंस्कारो नाश्यतां अन्यविषयकस्मृतिविरहस्थले तद्विषयकस्मृतिघटितसामग्रीविरहात्प्रयो-
जकत्वादिति दूषणस्य नावकाशः समूहालंबनात्मकतद्विषयकसंस्कारनाशप्रयोजकसामग्र्या अन्यवि-

गदा॰ षयकस्मृतित्वादितित्वात् समूहालंबनसंस्कारे च तादृश्याः कस्या अपि सामान्याऽज्ञानस्य लेशसत्त्वात् न चैवम॰

27 पि गोत्वाभाववान् गोत्वाभाव इत्यादिज्ञानजन्यसंस्कारस्य गोत्वाभाव इत्याकारकस्मरणाद्विनाशापत्तिः तादृ॰

शसंस्कारनाशे तादृशस्मृतिसहकारिणां यावत्तद्विषयविषयकसंस्कारभेदानां सत्त्वात्तद्विषयगोत्वाभावा॰

दिविषयसंस्कारभेदस्य च तत्र सहकारित्वात् गोत्वाभावादिनिष्ठतत्तत्संबंधस्यापि तत्त्वरूपतया तादृशस्मृति॰

नाश्यसंस्कारविषयत्वेन तद्विषयकसंस्कारभेदस्यापि तादृशस्मृत्यसहकारित्वासंभवादिति वाच्यं तत्तत्प्रका॰

रकान्यसंस्कारनाशे तत्प्रकारकभेदत्वेन हेतुता या उपगम्यते या गोत्वाभाव इत्यादिस्मृतिनाश्यसंस्कारसाधा॰

रणस्य गोत्वाभावादिप्रकारकसंस्कारभेदस्य तादृशस्मृति सहकारितया गोत्वाभाववान् गोत्वाभाव इत्यादि॰

धीजन्यसंस्कारे तादृशभेदासत्त्वेनोक्तापत्त्यभावात् द्रव्यत्वादिना घटपटादिविशेष्यकसंस्कारस्य तेन रूपेण घ॰

टादिमात्रविशेष्यकस्मृतितो विनाशवारणाय तत्तद्विशेष्यकसंस्कारनाशे तद्विशेष्यकसंस्कारभेदस्य हे॰ २७

तुत्वमपि वाच्यं एवं समानप्रकारकसमानविशेष्यकनानासंसर्गावगाहिसंस्कारस्यैकमात्रसंसर्गकस्मृतितो

विनाशवारणाय तत्तत्संसर्गकसंस्कारनाशे तत्तत्संसर्गकसंस्कारभेदस्यापि हेतुता वोध्या वस्तुतस्तु यादृ॰

शधर्मविशेष्यतानिरूपितत्तत्संसर्गकसंस्कारभेदो हेतुरिति बोध्योपगन्तव्यं अन्यथा द्रव्यत्वपृथिवीत्वोभयरू॰

पेण घटं पटं चावगाहमानस्य द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पटमवगाहमानात्स्मरणाद्विनाशापत्तेः त॰

त्र द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पटमवगाहमानस्य संस्कारस्य यादृशसामग्रीतो नाशः तादृशसामग्र्या

स्तत्राप्यसत्त्वान्नादृशसंस्कारस्यापि द्रव्यत्वपृथिवीत्वोभयप्रकारकतया घटपटोभयविशेष्यकतया च तत्तत्रा॰

शकसामग्र्यां तत्तत्प्रकारकसंस्कारभेदतद्विशेष्यकसंस्कारभेदप्रवेशात्तत्राप्यसामग्री च घटवा द्रव्यत्वपृथि॰

५+ वच्छिन्नतादृशधर्मप्रकारतान्यसंस्कारनाशे तथाविधतादृशधर्मप्रकार +५

वीत्वेन तद्धर्मप्रकारकसंस्कारभेदानां घटपटभिन्नविशेष्यकसंस्कारभेदानां चोक्तसमूहालंबनसंस्कारेऽपि
सत्वात् संस्कारनाशे प्रतितादात्म्यसंबंधेन संस्कारत्वेनापेक्षाहेतुता कल्पनीया अतः संस्कारनाशप्रतितादा
त्म्यसंबंधेन संस्कारत्वेनापेक्षाहेतुता कल्पनीया अतः संस्कारनाशकसामग्र्यनाहत्यादिसाधारण्येकोवि
न्नसमूहालंबनजन्यघटपटादिसंस्काराभिन्नाभिन्ना एव संस्काराः संस्कारयौगपद्ये ज्ञानविरहात् तथा च स्व
सृज्ञिविषयितावत्त्वस्यापि स्मृतिनिष्ठनाशजनकतावच्छेदकमन्यासन्नि घटकात्वोपगमात् घटादिस्मृत्यानप
टादिसंस्कारस्य विनाशेन तस्य तत्स्मृतिसृज्ञिपटादिविषयितावत्त्वाभावात् अन्यकाले पटादिस्मरणानिर्वा
हः एवं च घटवद्भूतलमित्यादिविशिष्टज्ञानात् घट इत्यादिस्मृतिनिष्ठप्रत्येकपदार्थविषयिताशून्या एव विशि
ष्टगोचरसंस्कारा उपगम्यंते ते च तत्ताहृशस्मृतिना विनश्यंति तत्र ताहृशस्मृतिनिष्ठविषयितावत्त्वविरहात्
अत उत्तरकाले विशिष्टस्मृतिनिर्वाहः घट इत्यादिस्मृतेरपि घटादिविषयकसंस्कारत्वावच्छिन्ननिष्ठसं
स्कारफलतया तद्यावतेनाय फलस्य समानाकारतावाचनसंगतिरित्याहुः स्मृतिसृज्ञित्वाभावविशिष्टवि
षयतायाः स्मृतिसृज्ञित्वाभावसत्त्वेन तथा प्रतिबंधात् न समूहालंबनसंस्कारनाश इत्यपरे न त्वनुगतहृपे
णास्मृतेः संस्कारनाशकत्वे निर्युक्तिकं भवतो गोचरस्मृतिजन्यस्यैव ममानुभवजन्यसंस्कारस्याप्रसिद्धान
नुगतकालादेर्नाशकतायाश्च नावश्यकत्वादिति वाच्यं ज्ञानत्वेन संस्कारहेतुतामते चरमस्मृतिविशेषा
णां संस्कारनाशकत्वनिर्वाहाय तत्तद्व्यक्तित्वेन तासां प्रतिबंधकतायाः कल्पनीयतया अनुभवत्वेन संस्कारहे
तुतावादिन उक्तस्थले अनुभवजन्यसंस्कारनाशोऽननुगतानां हेतुत्वे गौरवान् नवकाशात् चरमस्मृतिव्यक्ती
नामपि तत्तद्व्यक्तित्वेन संस्कारनाशकतासंभवात् संस्कारस्य फलनाश्यत्वप्रवादसंगतिरित्यनुभवत्वेन

ग०दी०

28

स्मृतिसंस्कारहेतुतायांनोद्बोधकावकाशइत्यतआह ज्ञायतेचेतिअनुभवजन्यसंस्कारापेक्षयास्मरणात्
दृढाः तदुत्तरस्मरणादितश्चदृढतरदृढतमाः संस्काराजायंतेतदुत्पत्त्यवश्यमेवस्वीकार्यंकार्यंचउक्तःस्वरूपजा
तिभेदोस्मृदिति स्मृतेत्याह प्रयोजकः नचानंदेवनाशसंपन्नमदित्युद्बोधकसमवधानादेवस्मृदिति स्मृतिनिय
मोपपत्तौनतत्प्रयोजकतयासंस्कारगतोजातिविशेषःसिद्ध्यतीतिवाच्यंयादृशसंबंधविशेषज्ञानसत्वेपुनः
पुनः स्मरणोत्तरंनियमतःस्मृतिर्नत्वनुभवमात्रोत्तरंतादृशोद्बोधकघटितसामग्र्याअनुगमायसंस्कारग
तजातिविशेषस्यावश्यकत्वादिति स्मृतेः दैवाधीनत्वमुपगम्यसंस्कारातिशयखंडनेशास्त्राद्यावश्यासमोपि
नोपयुज्येतेतिनानानुभवत्वेनस्मृतिसंस्कारादौनासंभवइत्यपायः इदंतुबोध्यं दृढतरादिसंस्कारंप्रतिसमा
नविषयकस्मृतित्वेनातादृशस्मरणोत्तरस्मरणत्वादिनानहेतुतापुनः पुनरनुभवादपिसंस्कारदार्ढ्यदर्श
नात् नापिसमानविषयकज्ञानोत्तरज्ञानत्वादिनाउपेक्षोत्तरोत्पन्नोपेक्षातोदृढतरसंस्कारानुदयात् रोगा
दिनाज्ञानार्थगोचरसंस्कारनाशोत्तरजातज्ञानाद्दृढतरदयाच्च किंतुसमानविषयकसंस्कारत्वेनदृढसं
स्कारंप्रतिदृढतरादितादृशसंस्कारत्वेनदृढतरदृढतमसंस्कारंप्रतिजनकता अतएवभावनायःपटु
तरभावनाजनकताप्रवादः भावनयाभावनांतरजननेचयद्योत्तरज्ञानंसहकारितस्यचसंस्कारत्वावच्छि
न्नंप्रत्येवस्मृतिसाधारणाज्ञानत्वघटितधर्मप्रकारकत्वेनहेतुतानचैवंस्वजन्यज्ञानसहकारेणैवस्वज
नकज्ञानसहकारेणापिसंस्कारःपटुतरंजनयत्विति वाच्यं स्वजन्यसंस्कारानुपहितज्ञानत्वेनैवसंस्का
रहेतुत्वोपगमात् अन्यथाविनश्यदवस्थज्ञानात्पटुतरसंस्कारोत्तरस्यदुर्वारत्वात् अनंताप्रामाणिक
संस्कारकल्पनागौरवेणोपेक्षणीयत्वादित्यादिज्ञानत्वेनस्मृतिसंस्कारहेतुत्वेयत्नांतरमाह परित्यज्य

५८

चेति निश्चितः कार्यतावच्छेदकावच्छेदेनाव्यभिचारो यद्रूपावच्छिन्नस्य तन्निश्चिताव्यभिचारकं दृश्य
मानोः कार्यसंशयसाधारणज्ञानविषयीभूतो यद्रूपावच्छिन्नस्य व्यभिचारः तत्त दृश्यमानाव्यभिचारकं
तथाच ज्ञानत्वावच्छिन्नस्य स्मृतिसंस्कारयोर्न व्यभिचारः कापि स्मृतेः संस्कारादिजनकत्वस्य संदि
ग्धत्वादनुभवत्वावच्छिन्नस्य तत्र व्यभिचारः संदिग्ध इति न तेन रूपेण कारणताग्रहः संभवतीति भावः
यद्यपि व्यभिचारसंशयस्य तत्र ग्राह्यसंशयतया कल्पनात्मककारणताग्रहेन विरोधित्वसंभवः ग्रा
ह्यसंशयस्य परोक्षज्ञानाविरोधितायाः सर्वसंमतत्वात् तथापि कारणतायां सामान्यविशेषरूपावच्छिन्न
त्वयोः संशये सामान्यरूपेणैव तत्र पूर्ववर्तितावच्छेदकत्वे कल्पनागौरवमिति गौरवप्रतिसंधानेन प्रतिबंधा
द्विशेषरूपेऽवच्छेदकत्वग्रहो न भवतीति बोध्यम् इदमेव निश्चिताव्यभिचारकत्वमेव अन्यत्र प्रवृत्त्यादिका
र्येपि सामान्यस्येष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकनिश्चयत्वापेक्षया अधिकसंग्राह
कस्य तदुभयवैशिष्ट्यावगाहिनिश्चयत्वादेः संस्कारस्य स्मृतिजन्यत्वेनापत्तिं ज्ञानत्वावच्छिन्नत्वेन तत्र
टीकाकारसंवादमाह अभिहितं चेति स्वकार्येति स्वं स्मृतिः तत्कार्ये यः स्मरणानंतरोत्पन्नविशेषगुण
विधयाविरोधायादृकोयासांतासामित्यर्थः एतच्च तृतीयक्षणानवस्थानं ननिर्वाहकं विचक्षणादित्यज्ञानामेक
क्षणानवस्थानरूपसहभावप्रयोजकतया अभिहितं चरमज्ञानपदस्येति अनुभवपरत्वात् अनुभवत्वा
वच्छिन्नरूपविशेषार्थकत्वात् तथाच तादृशानिश्चयत्वावच्छिन्नजन्यानुभवत्वेन लक्षणं तस्य चानुभवत्व १
मून्यायां स्मृतावतिव्याप्तिर्न पूर्वं कास्मदमयीति भावः अन्यस्य समाधानांतरमुपन्यस्यति समानकालादिति साक्षा
तज्जन्यत्वं तज्जन्याः जन्यत्वे सति तज्जन्यतावच्छेदकावच्छिन्नजन्यायां स्मृतौ नास्तीति भावः अत्र गौरवमहं

गदा०

29

रमवीजं विशिष्टवैशिष्ट्यबोधहेतुतायाः ज्ञानत्वनिवेशनव्यवस्थापनायाः कर्तुं शक्यते न तत्रातिव्याप्तिर्यथा
वारणीयाविशिष्टस्मरणोपि तेनैव प्रकारेण तद्वारणसंभवतीति चरमज्ञानपदस्यानुभवपरत्वमपि नाल-
वनीयमिति आशयवानाह व्याप्येति व्याप्यविशेष्यकात् आधेयतासंबंधेन व्याप्यरूपविशेष्यपक्षप्र-
कारकात् पर्वते वह्निव्याप्य इत्याकारकात् पक्षविशेष्यकात् अधिकरणतासंबंधेन पक्षरूपविशेष्ये व्या-
प्यप्रकारकात् वह्निव्याप्यवान्पर्वत इत्याकारकात्परामर्शात् अनुमितिदर्शनात् अविलक्षणायाः प-
र्वतो वह्निमानित्यनुमितेरनुभवात् तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन उभयानुगमकेन व्याप्यपक्षोभ-
यनिरूपितवैशिष्ट्यविषयताशालिनिश्चयत्वेन तत्र हेतुत्वं अनुमितिं प्रतिकारणत्वेन तद्विशिष्टवैशिष्ट्यबो-
धविशिष्टस्मरणजनकतावच्छेदकेन व्याप्यप्रकारकपक्षविशेष्यकनिश्चयत्वादिनान्यतरासंग्रहादिति
भावः नन्वैशिष्ट्यमत्र व्याप्यताघटकसंबंधरूपं विवक्षणीयं अन्यथातिप्रसंगात् एवं च संयोगावच्छि- २९
न्नकारणत्वमेव धूमादेर्व्याप्यताघटकं न त्वाधेयत्वं न तत् अत उक्तरूपेण पक्षप्रकारकस्य पर्वतो धूम इत्यादि
ज्ञानस्यासंग्रहः तत्र संयोगावच्छिन्नाधेयत्वस्यैव संसर्गत्वात् न चोभयत्र व्याप्यताघटकः संयोगादिरेव सं-
सर्गो न त्वाधाराधेयभाव इति वाच्यं पर्वतादिप्रतियोगिकसंयोगादेर्धूमादिरूपविशेष्यानुयोगिकत्ववि-
रहेण तादृशप्रत्ययस्य भ्रमत्वापातात् आधाराधेयभावानवगाहने संसर्गमूलत्वानुपपत्तेश्च न च संयोगाद्य-
वच्छिन्नाधेयत्वमेव च तत्र संबंधः तत्संसर्गकत्वेपि तदंतर्गतसंयोगादिसंसर्गकत्वमक्षतमिति वाच्यं विशिष्ट-
संसर्गकत्वेपि विशेषणीभूतसंयोगादेः संसर्गतावच्छेदकतया तद्विषयतायाः प्रकारविशेष्योभयनिरूपित-
त्वाभावात् अन्यासंयोगावच्छिन्नाधेयतासंबंधेन व्याप्यप्रकारकात् व्याप्योपर्वत इत्यादिज्ञानात्संयोगाद्य

वह्निन्नाधारतासंबंधेन पक्षप्रकारकात् पर्वतवान् धूम इत्यादिज्ञानाच्चानुमितिप्रसंगात् एतेनाधाराधेय
त्वयोः स्वल्पविन्निवेश्यतया संसर्गोगाह्यवह्निन्नाधारत्वावगाहित्वेन ताद्रूप्याधेयत्वावगाहित्वेन वा व्याप्यपक्ष
विशेष्यकपरामर्शयोरनुगम इति निरस्तं व्याप्यपर्वत इत्यादिधियोऽवीरत्वात् व्याप्यनिरूपिताधारत्वा
वगाहित्वेन पक्षनिरूपिताधेयत्वावगाहित्वेन वाऽनुगमस्य स्वरूपनिरूपिताधारत्वसंबंधावगाहिभ्रमासंग्र
हेणासंभवात् अथ पर्वते धूम इत्यादिस्मरणस्थलेऽपि प्रतीतौ संयोगावह्निन्नाधेयतामेव धूमे पर्वतस्य संसर्गा
तयाभासतां साच पर्वतधूमयोः संयोगानवगाहितया नानुमितावहेतुरेवोरूपेणानुगमस्तु संयोगसंबंधे
नैव व्याप्यांशे यः पक्षप्रकारकः ये च पक्षांशे तत्संबंधेनैव व्याप्यप्रकारकः तयोरेव परामर्शयोः स्वीकारणी
यप्रमयज्ञानस्योत्पादकत्वाभ्रगत्वे तस्यानुमितिहेतुतायास्तेनासप्रयोगादित्याख्येयत्वात् इति चेन्न व्या
प्यतावच्छेदकसंयोगेन व्याप्यस्य पक्षवृत्तायाः तत्र साध्यासत्वेप्युपपद्यमानतया व्याप्यांशे तेन संबंधेन त
द्वज्ञाज्ञानस्य तत्र पक्षे साध्यानुमितिहेतुतायाः अननुभवविरुद्धत्वात् अन्यथा समवायादिना द्रव्यत्वादिव्या
प्ये गुणादौ तेन संबंधेन सत्वादिप्रकारकभ्रमानात्मकज्ञानात्सत्वादौ बाधानवतारदशायां द्रव्यत्वादितिसिद्धिप्र
संगः अत्राहुः आधाराधेयत्वयोः स्वल्पविन्निवेश्यतामते वर्पर्वते धूम इत्यत्राधारतानिरूपिताधेयता धूमवान्
पर्वत इत्यत्र चाधेयतानिरूपिताधारतासंबंधः न तु स्वल्पमुभयोः संसर्गतयाभाने प्रत्येकमुभयोरुभयप्रकार
त्वापत्तेः एवंचोभयत्रैवाधारत्वविषयता पर्वतविषयतया आधेयत्वविषयता च धूमविषयतया निरूपिता
तथा च पक्षविषयतानिरूपितायाम् आधारताविशेषविषयता तन्निरूपितनिरूपितत्वविषयतानिरूपिता
धेयत्वविषयतानिरूपितव्याप्तिविशिष्टविषयताशालित्वेन द्वयोरनुगमः व्याप्यपर्वतः पर्वतवान् धूम इत्य

त्र च पक्षविषयतानिरूपिताधेयत्वविषयताव्याप्यविषयताधारत्वविषयतानिरूपितेति वैपरीत्यान्नोक्ता-
नुगमकरूपसत्वे तत्साधारण्यमिति तानि प्रसंगः न चाधारत्वावगाहित्वस्य कारणतावच्छेदकत्वेन तदनवगा-
हिनो व्याप्यताघटकस्य धूमसंयोगादिना पक्षे हेतुसामानाधिकरण्यस्य व्याप्तिघटकतया हेतुनिरूपिताधार-
त्वावगाहिधियः पक्षानुमितिजनकत्वात् यदि च संयोगादेरेव संसर्गतया व्याप्तिप्रविष्टहेतुसामानाधिक-
रण्यघटकः नाधारत्वं तदा संयोगादेर्यत्र हेतुतावच्छेदकसंबंधता तत्र तेन संबंधेन व्याप्यप्रकारकप-
क्षविशेष्यकं ज्ञानमेवानुमितिजनकं न तु संयोगाद्यवच्छिन्नाधेयता संबंधेन पक्षप्रकारकं व्याप्यविशे-
ष्यकं ज्ञानं हेतुपक्षयोः संबंधविधया व्याप्यतावच्छेदकसंबंधानवगाहनात् तस्याधिकविषयकत्वेन गौरव-
स्य पक्षविशेष्यकपरामर्शे हेतुतायां विनिगमकत्वाच्च परे तु यत्र तादात्म्यसंबंधेन हेतुता तत्रैव व्याप्यपक्ष-
विशेष्यकपरामर्शयोः व्याप्यपक्षोभयविषयतानिरूपिततादात्म्यसंसर्गकज्ञानत्वेन हेतुता तत्र च न कश्चि-
दतिप्रसंगः निष्कृष्टजातिघटितानुमितिलक्षणस्यावश्यकत्वेन तादृशकारणताघटितलक्षणस्यैव सर्वसा-
धारण्यसंभवात् न च जातिघटितलक्षणे जातावनुभवत्वव्याप्यत्वस्यावश्यं निवेशनीयतया सत्तो समान-
प्रकारकत्वेन कार्यकारणभावव्यवस्थापनमपि विफलं तावतैव सत्तावति प्रसंगवारणसंभवादिति वाच्यं
कार्यतासमानाधिकरणानुभवत्वव्याप्यजातिघटितलक्षणापेक्षया लाघवेन कार्यतावच्छेदकजातिघटितल-
क्षणस्यादरणीयतया सत्तो व्याप्यपक्षविशेष्यकपरामर्शत्वसाधारणरूपेण हेतुत्वेन तादृशकारणताप्रति-
योगिककार्यतावच्छेदकस्य तत्त्वजातिमात्रस्य ग्रहणातिव्याप्तेः प्रसक्तातादृशलक्षणाभिप्रायेणानुभव-
त्वव्याप्यजातिघटितलक्षणेपि सत्तावगतरूपेण हेतुत्वेऽनुभवत्वान्यानुभवान्यासमवेतत्वरूपानुभव

त्वव्याप्यत्वमपेत्यलचोरनुभवनिष्ठभेदप्रतियोगितावच्छेदकासत्त्वरूपस्यानिवेशनं संभवतीत्यभिप्रायेणाव
स्तौ विशेष्यरूपेणा हेतुत्वमवस्थापनसंगतेः लक्षणघटकमपि तदेवेति उभयवैशिष्ट्यावगाहिनिश्चयत्व
रूपानुगतधर्मावच्छिन्नकारणत्वमेव प्रकृतलक्षणघटकमपेयमित्यर्थः अन्यरूपावच्छिन्नहेतुताघटित
लक्षणस्य लक्ष्यपवसत्त्वादिति भावः विशिष्टस्मृतिकारणतानां नानुगतरूपावच्छिन्नत्वेऽपि तद्विशेष्यरू
पावच्छिन्नेतिन तत्रातिव्याप्तिरिति आह एकतरेत्यादिना तत्र विशिष्यैव कार्यकारणभावद्वयं तेन तत्र स्मृतिः
कारणतायां लेविशिष्यैव व्याप्यप्रकारकपक्षविशेष्यकस्मृतित्वतादृशनिश्चयत्वादिरूपविशेषधर्मपुरस्का
रेणैव कार्यकारणभावः कल्प्यते इति शेषः अत्र हेतुमाह समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभा
वादिति तृतीयायां वैशिष्ट्यार्थकत्वात् समानप्रकारकत्वेनेत्यस्य समानप्रकारयोरित्यर्थः तथा चाऽसमा
नप्रकारकज्ञानस्य स्मरणाहेतुत्वादित्यवधारणार्थः एतावतानुगतरूपस्य कारणतातिरिक्तवृत्तित्वलाभः
असमानप्रकारकज्ञानस्य स्मृत्यकारणत्वे तस्य फलानुत्पादकत्वे हेतुमाह एकतरेति व्याप्यादिमात्रविशे
ष्यकज्ञानात् पक्षादिविशेष्यकस्मरणानुत्पत्तेरित्यर्थः एतदेव स्फुटयति अन्यथेति एकतरविशेष्यकज्ञा
नादपि अन्यविशेष्यकस्मृत्युत्पादोपगमे व्याप्यादिविशेष्यकस्मृतीनां पक्षादिविशेष्यकत्वनियमापत्तेरित्य
त्यर्थः केचित्तु नियमेनेत्यत्र अप्रकारप्रश्लेषः तथा च नियमेन नियामकाभावेन स्मृतेः स्मृतिमात्रस्योभ
यविशेष्यकत्वप्रसंगादिति व्याचक्षते विशिष्टवैशिष्ट्यबोधासाविति विशेष्यतावच्छेदकप्रकारकविशेष्य
णविशेष्यकनिश्चयत्वावच्छिन्नजन्यव्याप्यविशिष्टपक्षवैशिष्ट्यबोधासावित्यर्थः आदिना परामर्शानुव्यवसा
यपरिग्रहः व्यतिरेकिणो व्यतिरेकव्याप्तेरेव गमकता पक्षे अन्वयव्यतिरेकव्याप्तिप्रकारकतयोर्व्यभिचारधीप्र

निबंधकतावच्छेदकत्वेनानुगमय्य कारणतावच्छेदकत्वमनेनाह शाकारणताया एव लक्षणे निवेशादेकविधव्या
प्त्यवगाहिज्ञानादन्याविधव्याप्तिविषयकाविशिष्टवैशिष्ट्यबोधाद्यनुदयात् तज्जनकतावच्छेदकगर्भे विशिष्टवै
तत्तद्व्याप्तिविषयतानिवेशेनैकरूपेणानुमितिविशिष्टवैशिष्ट्यबोधादिहेतुताविरहात् तत्र नातिव्याप्तिप्रस
क्तिरित्याह वह्न्याद्यनुमितावित्यादिना विशिष्टबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयहेतुतानानुप्रप
गेतु मिश्रमते व्याप्यविशिष्टपक्षवैशिष्ट्यप्रत्यक्षादिसामान्येऽतिव्याप्तिविरहेप्यभावबुद्धौ प्रतियोगितावच्छे
दकप्रकारकप्रतियोगिविशेष्यकनिश्चयत्वेन हेतुता मिश्रेणावश्यं स्वीकरणीयेति वह्निव्याप्यवान्पक्षो ना
स्तीत्याद्यभावग्रहे तन्मतेप्यतिव्याप्तिरस्तीति दर्शितरीत्यैव वारणीयेत्याह अत एवेति अत एव उक्तरूपावच्छिन्न
कारणताया लक्षणे प्रवेशादेव व्याप्यवत् पक्षाद्यभावग्रहं प्रतीति पक्षतावच्छेदकावच्छिन्नविशेषणत
याव्याप्तिवैशिष्ट्यावच्छिन्नाया प्रतियोगितायानिरूपितानुयोगितामप्रकारकाभावलौकिकं प्रतीत्यर्थः व्या ॥२२॥
प्यवत्पक्षादिज्ञानत्वेन व्याप्तिविशिष्टप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वेनेत्यर्थः दंडोर
क्तो नास्तीत्याद्यभावग्रहस्य दंडो रक्तो न वेति संशयादन्यत्वेनैवानुभविकतया विशिष्टवैशिष्ट्यबोधे विशेषणता
तावच्छेदकप्रकारकधीहेतुतावादिनो न हि शेषहेतुतायामिव मिश्रमते विधर्मितावच्छेदकप्रतियोगि
तावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन हेतुताया निश्चयत्वनिवेशस्यावश्यकत्वात् इति भावः न त
तिः नातिव्याप्तिः व्याप्यपक्षविशेष्यकयोरन्वयव्यतिरेकव्याप्तिप्रकारयोः परामर्शयोरनुगमकरूपस्या
भावप्रत्युततज्जनकतानवच्छेदकत्वादिति भावः यदि चानुमितिपरामर्शयोः समानविशेष्यकत्वा
नुभवादनुभवानुरोधात् विनिगमकान्तराद्वा पक्षविशेष्यक एव परामर्शोनुमितिहेतुरुपेयते व्याप्ति

रेकसहचारेणान्वयव्याप्तिरेवगृह्यते इति मतं व्यतिरेकव्याप्तेरनुमितिप्रयोजकत्वेपि मणिमंत्रादिन्यायेन विरोधि
त्वयात्र प्रामाणिकतयाऽनुगमासंभवेन पृथक् पृथगेव व्याप्तिज्ञानयोरनुमितिहेतुता व्यतिरेकिग्रंथे दर्शनीया इ
तीत्याद व्यभिचारवारणं तदानीमुक्तरीतिद्वयेन विशिष्टवैशिष्ट्यबोधाद्यावतव्याप्तिवारणसंभवः नवापूर्वोक्तरी
त्यात्रानुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यबोधवारणाय तन्निवेशेहेतुतायां ज्ञानत्वप्रवेशस्यावश्यकत्वादित्यालोच्य तदिति
व्याप्तिवारणाय विशेषणांतरं प्रवेशयति व्याप्तिविषयकत्वेनेति लिंगोपधानस्य मणिकृतानभ्युपगमात्तन्मतेः
संभवेन तत्तानिरुक्तविशिष्टबोधविशिष्टस्मरणादेर्व्याप्तिविषयकत्वनियमान्नातिव्याप्तिरिति भावः नन्वनुद्बुद्धसं
स्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिवारणाय उद्बोधकाभावविशिष्टसंस्कारान्यत्वमेव विशेषणं तावच्छेदक
प्रकारकज्ञानहेतुतायां निवेश्यं न तु ज्ञानत्वं पूर्वोपदर्शितव्यभिचारस्य दुर्वारत्वात् अननुगतिकतया जनक
तावच्छेदकगौरवस्याऽदोषत्वात् भेदस्याव्याप्यवृत्तितायाउपगेनव्यनयाऽनुद्बुद्धसंस्कारे उद्बोधकाभावविशिष्ट
तद्भेदसत्त्वात् तत्राह यावत्संस्काराद्विशिष्टवैशिष्ट्यस्मरणानिर्वाहः संस्कारनिष्ठत्वविशेषितस्योद्बोधकाभाववै
शिष्ट्यस्यात्यंताभाव एव वा निवेशः स च उद्बोधकासमवहितज्ञानादिसाधारणोपि तथा च ज्ञानत्वस्य विशिष्टवैशि
ष्ट्यधीजनकतायां अनिवेशादेवातिव्याप्तिवारणसंभवे किं व्याप्तिविषयकत्वनिवेशनेनापि वारणसंभवादि
त्याशंक्य ज्ञानत्वेन विशिष्टवैशिष्ट्यबोधहेतुतायां व्यभिचारमुद्धरन् व्याप्तिविषयकत्वनिवेशस्य तदतिव्याप्ति
वारणप्रयोजकत्वं दर्शयति एतेनेत्यादिना प्रथमतो विशिष्टवैशिष्ट्यस्मरणे व्यभिचारमुद्धरति स्पष्टं प्रतीत्या
दिना कल्पत्रयेण संस्कारद्वारेति विशेषणधियो हेतुत्वस्य कल्पनादित्यन्वयः तथा च न स्मृतौ ज्ञानत्वावच्छि
न्नस्य व्यभिचारः विशेषणज्ञानजन्यसंस्कारोत्पत्तिक्षण एव विशिष्टानुभवोत्पत्त्या तत्र संस्कारद्वारा हेतुत्वाः

गदा.
32

संभवेपिनक्षतिः साक्षादेवतत्रतथात्वादित्याह अत्रभवंप्रतिचेति नचसाक्षाद्धेतुत्वेस्मृतौपरंपरयाहेतुत्वेवा-
नुभवेव्यभिचारात्कथमयंकल्पः संभवद्युक्तिकइतिवाच्यंस्वस्वव्यापारान्यतरत्वावच्छेदेननियतपूर्ववर्तिता-
याएवकारणताघटकत्वात् प्रत्येकव्यभिचारस्याकिंचित्करत्वात् नचव्यापारघटितायस्यकारणतातदीय-
व्यापारमात्रसत्वेकार्योत्पत्तिरापद्यतेति तथाचसंस्कारादप्यनुभवसामग्रीसहकृतात्विशिष्टवैशिष्ट्यबोधापत्तिः
यदिचज्ञानस्यस्वतः पूर्ववर्तितायाअपिकारणताघटकत्वान्नस्तत्वमपेक्षितंतदास्मरणेनापितदपेक्ष्यतांअतो-
व्यापारघटितमेकंकारणत्वंअन्यच्चतदघटितंवाच्यं तथाचतत्रदर्शितव्यभिचारोऽवारएवेत्याशयेनकल्पां-
तरमाह निर्विकल्पात्मकस्यवास्मरणस्येतिविशिष्टस्मृतिपूर्वमित्यादिः कल्पतादित्यनेनान्वयः अत्रनिर्विक-
कस्मरणकल्पनयाविशिष्टवैशिष्ट्यावगाहिस्मरणस्यनोपपत्तिः निर्विकल्पकस्यविशेषणतावच्छेदकप्रका-
रकत्वविरहात् किंतुविशिष्टवैशिष्ट्यस्मरणात्पूर्वंविशिष्टविशेषणस्मरणकल्पनयैवतदुपपत्तिः केचित्तुवि २२
शेषणाधियइत्यग्निमस्यविशेषणतावच्छेदकप्रकारकधियइत्यर्थकतयाविशेषणविषयकादित्यादिपूर्व-
ग्रंथेपिविशेषणविषयकपदस्यविशेषणतावच्छेदकप्रकारार्थकतयाविशिष्टस्मरणपदस्यविशिष्टवै-
शिष्ट्यस्मरणपरतयाविशेषणतावच्छेदकप्रकारकज्ञानत्वेनहेतुतायामेवव्यभिचारप्रदर्शनपरइतिन-
संदर्भविरोधः नचैवंनिर्विकल्पकात्मकस्यवेतिग्रंथविरोधः विशेषणतावच्छेदकप्रकारकस्मरणोपधा-
यकतयातज्ज्ञोपचारनिर्विकल्पकस्मरणोपगमस्यसंगततावपिअत्रविशिष्टविशेषणस्मरणस्यकल्पनीयत्वात्क-
थनेनन्यूनतापत्तिरितिवाच्यं यतःस्मृतेर्निर्विकल्पकतायाःसविवादतयातादृशस्मृतेर्नसंभवतीतिविशिष्ट-
वैशिष्ट्यस्मरणपूर्वंविशिष्टस्मृतिकल्पनेनसंभवतीतिविशिष्टवैशिष्ट्यधीहेतुतायामिवाविशिष्टधीसामा

न्यहेतुतायामपि ज्ञानत्वनिवेशो कृतो ऽल्पत्वादित्थमप्यत्रैव न ज्ञानत्वप्रवेश इत्यभिप्रायेणो ऽवमेवं मतिव्याप्ति-
समाधानं एवं चेदानीं निर्विकल्पकस्मरणकल्पनेनैव प्रत्यक्षस्थलदृष्टनिर्विकल्पकविशिष्टवैशिष्ट्यज्ञानानि स्मृ-
तिस्थले क्रमशो भवंतीति विशिष्टवैशिष्ट्यबोधप्रति ज्ञानत्वेन हेतुत्वे बाधकाभाव इत्यर्थतो लाभात् तत्र विशि-
ष्टस्मृतिकल्पनाकथनेऽपि न न्यूनतेति वदंति अथातिप्रसंगवारणाय समानप्रकारकत्वेनैव स्मृतिं प्रति संस्कार
ज्ञानयोर्हेतुत्वात् न निर्विकल्पकस्मरणसंभवः घटत्वादिविशिष्टतरघटादिगोचरसंस्कारादिजन्यता
निर्विकल्पकसाधारणस्य घटत्वादिभिन्नप्रकारतानिरूपितविशेष्यताभिन्नतद्घटादिविषयकस्मरणं तत्र
घटत्वविशिष्टतद्घटविषयकसंस्कारादेर्व्यभिचारः एवं निर्विकल्पकस्मरणोपगमे प्रमेयत्वादिसामान्यल-
क्षणाजन्यज्ञानाद्विश्वविषयकनिर्विकल्पकस्मरणात् स्वरोपनतो निखिलजातिप्रकारकं ज्ञानं स्यात् न च ता-
दृशज्ञानमसर्वज्ञस्यानुभवसिद्धं न च स्वरूपतः तत्प्रकारकस्मृतौ स्वरूपतः तत्प्रकारकस्य संस्कारादे-
र्हेतुतया तादृशाकारणाभावात् सकलजातिनिर्विकल्पकसत्वेपि न स्वरूपतः सकलजातिप्रका-
रकस्मरणसंभवः तादृशप्रत्यक्षादेर्युगपत् सकलजातिसंनिकर्षविरहेणानापत्तिसंभव इति वाच्यं ज्ञा-
नसन्निकर्षसत्वेन तादृशमानसस्य दुर्वारत्वात् तत्कथमिदानीमपि निर्विकल्पकस्मरणमंगीकृतमि-
ति चेन्न अनुद्बुद्धसंस्कारान्यत्वापेक्षया लघुतया ज्ञानत्वेन विशिष्टधीहेतुतासिद्धांतनिर्वाहकतया निर्वि-
कल्पकस्मरणस्यावश्यकत्वेन तद्विषयकस्मृतौ तद्विषयकसंस्कारत्वादिना सामान्यहेतुत्वान्तरस्य
कल्पनीयतया विशिष्टसंस्कारादितो विशिष्टस्मरणस्येव तत्त्वेन निर्विकल्पकस्यापि वारणे स्मरस्य
संभवः न चोक्तक्रमेण सार्वज्ञापत्तिः स्वरूपतस्तत्प्रकारकोपनीतभाने स्वरूपतस्तत्प्रकारक

गदा. ज्ञानस्य हेतुत्वोपगमात् तद्बोधकाकल्पनेनेन यावत्प्रमेयगोचरसंस्काराणां यावज्ज्ञातिनिर्विकल्पकस्यापि
वारणासंभवात् न तदनभ्युपगमेपि स्वरूपतो भानायोग्यप्रमात्वघटकपदार्थनिर्विकल्पकमेव प्रमेयत्वा
37 दिविषयस्मरणजन्यतत्प्रकारकादिस्वविशेष्यकस्मरणादेव कालादौ प्रमेयत्वादिना सकलप्रमेयप्रकार
कस्मरणोपपत्तेरित्याशयेनेदानीं निर्विकल्पकस्मरणोपगमात् नन्वविशिष्टज्ञानं परित्यज्य विशिष्टानुभ
वत्वस्य जन्यतावच्छेदकत्वोपगमेनैव विशिष्टस्मृतौ व्यभिचारवारणे किं निर्विकल्पकस्मरणादिकल्पन
यानच विशिष्टविषयकानुभवत्वापेक्षया लघुविशिष्टविषयकत्वमेव स्मृतिसाधारणं विशेषणधीजन्य
तावच्छेदकं तथा च निर्विकल्पकस्मरणमावश्यकमेवेति वाच्यम् ज्ञानविनाशेपि तद्व्यापारभूतयाज्ञ्या
विशिष्टविषयज्ञातिजननात्तत्र व्यभिचारेणाविशिष्टविषयकत्वमात्रस्य विशेषणधीजन्यतावच्छेदकत्वाऽसंभ
वात् न चोपादानप्रत्यक्षस्य साक्षात् ज्ञातिहेतुतया ज्ञातौ न ज्ञानत्वावच्छिन्नस्य व्यभिचारसंभव इति वाच्यं । ३३
उपादानप्रत्यक्षस्य फलविषयकत्वानियमेन सुखत्वादिविशिष्टफलविशेष्यकज्ञातौ सुखत्वादिरूपो व्यभिचा
रस्य दुर्वारत्वात् एवं निर्विकल्पकस्मरणोपगमेपि ज्ञातिसाक्षात्कारस्यैवंविधस्मृतिकल्पनयानानुपपत्तिः
ज्ञातिद्वितीयक्षणोत्पन्ननिर्विकल्पकस्मरणेन विशिष्टविषयकस्मृतिजननकाले ज्ञातिनाशेन विशिष्टविष
योपधानेन ज्ञातिसाक्षात्कारासंभवादित्यालोच्यानुभवत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वमाह अनुभव
मिति तस्याः विशेषणधियः अनुभवत्वजात्यनंगीकारे विशिष्टप्रत्यक्षत्वस्यैव तथात्वं स्वीकरणीयमिति
ध्येयं इच्छाद्वेषसाक्षात्कारे व्यभिचारस्य कथितरीत्यानवकाशात् ज्ञातिसाक्षात्कारे व्यभिचारमुद्धरति निय
मत इति यत्र यत्र ज्ञातिसाक्षात्कारः तत्र ज्ञातिद्वितीयक्षणे विशिष्टविषयकस्मृतिं कल्पयित्वा तदनंतरक्षण

एवं भ्रान्तिप्रत्ययलोपगमादित्यर्थः न च भ्रान्तित्वनिर्विकल्पकविषयस्मरणयोर्योगपद्यादसंभवात् क्रमेण तदु
त्पत्तौ भ्रान्तेर्विनाशात् विषयविरहेण भ्रान्तित्वादिविशिष्टभ्रान्तिप्रत्यक्षानुपपत्तिरिति वाच्यं भ्रान्तित्वविशिष्टबुद्धे
तज्ज्ञानहेतुत्वानभ्युपगमेन तन्निर्विकल्पकस्यानभ्युपगमात् अत्र विशेषणधियो हेतुत्वेऽपि विषयस्मरणस्यैव
भ्रान्तित्वविषयकत्वोपगमेनोपपत्तौ तन्निर्विकल्पकस्यानावश्यकत्वात् अनादौ संसारे सर्वदैव भ्रान्तित्ववि
षयकसंस्कारसंभावनया भ्रान्तिस्मारतारजनकविषयस्य सत्त्वे तज्ज्ञाने बाधकाभावात् नचैवमन्यत्रापि निर्वि
कल्पकोच्छेदः घटत्वादेः प्राथमिकविशिष्टबुद्धिपूर्वं तत्स्मरणासंभवेन तन्निर्विकल्पकस्यावश्यकत्वा
त् यत्र विशिष्टज्ञानं तत्र चाक्षुषादिसामग्रीकाले घटादीन्द्रियसंयोगोत्पत्तिः तत्र द्वितीयक्षणे विशिष्टज्ञानं चाक्षु
षाद्युत्पादात् घटत्वादिस्मरणासंभवेन तदुत्तरं घटत्वादिविशिष्टधीनिर्वाहाय घटत्वादिनिर्विकल्पक
स्यावश्यकत्वात् अजन्यज्ञाने व्याप्यविषयकत्वनिवेशेऽपि यत्र व्याप्तिविशिष्टधूमादेः एतत्तावच्छेदकघटनात
त्पन्नानुमितौ वह्निं तद्व्याप्यधूमादिविषयकसमूहालम्बनानुमितौ वा व्याप्तिं साधयतः अनुगमनिबन्धनव्याप्यनुगम
प्रयुक्ता व्याप्तिवारणानुरोधेनावश्यविवक्षणीय वह्निव्याप्तिविशिष्टपर्वतत्वज्ञानजन्यव्याप्यविषयकज्ञानजा
तीयत्वस्य लक्षणे तथाविधानिराकरणमाह साध्यादेरिति आदिना सम्बन्धविशेषादिपरिग्रहः पक्षोपादाने पक्षसा
ध्यादिघटितव्याप्यादिविषयकपरामर्शजन्यताघटितलक्षणे न्यायानुमितौ अन्यसाध्यकानुमितौ दैवात्
दैववशसंपन्नसामग्रीविशेषात् तस्यामनुमितौ परमित्यनेनातिव्याप्तेरसंभवस्य च व्यवच्छेदः तादृशज्ञानेऽपि पर्व
तवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नजन्ये व्याप्यविषयके वह्निव्याप्यधूमविशिष्टपर्वतत्वाद्यवच्छि
न्नविषयकनिश्चयत्वावच्छिन्नजन्ये वा ज्ञाने इत्यर्थः तद्व्यक्तित्वं तत्समवेतत्वं अनेन संबन्धान्तरेण तद्व्यक्तिप्रत्यक्ष

गदा

35

त्वादिकमादाय ज्ञानमात्रेति व्याप्तिः सज्ञागुणत्वज्ञानत्वानुभवत्वजातीरादायाऽतिव्याप्तिवारणायाऽनुभवत्व
व्याप्तेति व्याप्यत्वमिह भेदगर्भमनुभवत्वान्यत्वे सत्यनुभवान्यासमवेतत्वरूपं विवक्षितं तेनानुभवत्वनिरासः
यद्यप्यनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वरूपं यत्किंचिदनुभवासमवेतत्वरूपं वा न तद्व्यापकत्वं निवेश्या
प्यनुभवत्वतद्भिन्नजातीनां वारणं संभवति तथापीदृशव्यापकजातिवारकप्रकाराणां जातिघटितान्यल
क्षणे बहुशो ग्रन्थान्तरे च दर्शितत्वाद्दिक्प्रदर्शनायैवैकः प्रकारोऽत्र दर्शितः व्यापकपदमेवं क्रमभेदगर्भव्याप्य
पेक्षया लघुशरीरं दर्शितं व्यापकत्वार्थकमिति तन्न यतः यां कांचिद्रीत्या दोषं दर्शितं भेदगर्भव्याप्तेर्व्याप्यपदार्थ
स्य स्फुटतयोपादाने नाविरोधादिति ध्येयं जातिपदं समवायेन तद्वत्वलाभाय अन्यथा जातिभिन्नज्ञानसमवेत
धर्माप्रसिद्ध्या जातित्वनिवेशावैयर्थ्यात् यद्यपि तादृशधर्मोऽत्रमितित्वं लक्षणे तदेव च लक्ष्यतावच्छेदकं तथा
पि स्वरूपतस्तस्य लक्ष्यतावच्छेदकता दर्शितरूपेण च लक्षणमित्यविरोधः ननु व्याप्याविषयकत्वस्य जन्यवि
शेषणत्वे संस्कारवारणायोमात्रज्ञानपदमनर्थकं व्याप्यवज्ज्ञाननिष्ठयत्त्वावच्छिन्नजन्यसंस्कारस्य व्याप्तिवि
षयकत्वनियमादित्याशंक्य तत्पदप्रकृतार्थलाभसंपादकतया सार्थकयति प्रकृतलाभायैव चेति जन्यपद
स्य लक्षणायामनुभवत्वव्याप्यजातिप्रकारेण जन्यजातीयार्थे तात्पर्यग्रहायैवेत्यर्थः अनुभवत्वोपस्थापकता
नपदसमभिव्याहारात् अनुभवत्वघटितोक्तार्थोऽघटितत्तज्जातीयस्य ग्रहात् पटो घटजातीयः द्रव्यमिति य
ज्ञानं पटजातीयमित्यादिवाक्यस्य स्वरसतोऽप्रयोगात् तज्जातीयार्थकपदस्य समभिव्याहृतेतरपदोपस्थाप्यध
र्मव्याप्यजात्याक्रान्तत्वप्रकारतया औत्सर्गिकत्वादिति भावः जातिघटनायाश्च प्रयोजनान्तरमपि दर्शयति एवं चे
ति पृथक्प्रयोजकत्वेऽपि अनुमितिनिरूपितविभिन्नकारणतावच्छेदकशरीरे विशेषरूपेण प्रवेशोपपत्तिः न

प्रकृतघटितलक्षणकरणे तु परव्याप्तिज्ञानजन्यानुमितावव्याप्तिः प्रकृतव्याप्तिज्ञानजन्यतीयत्वस्याऽपरव्याप्तिज्ञा
नजन्यानुमितावपि अलक्षणत्वादिति भावः कार्यतासामानाधिकरण्यस्थाने कार्यतावच्छेदकत्वनिवेशने जातीवनु
भवत्वव्याप्यत्वविशेषणं विनेव सत्त्वादिवारणं संभवतीति तादृशजातीनां परामर्शजन्यतावच्छेदककोटौ निविष्टत्वा
त् अनुमितित्वस्यैव तथात्वादित्याशयेनाह एवंचेति व्याप्यपक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुतामते
तद्रूपावच्छिन्नजन्यतायैवज्ञानानां तत्तत्व्याप्त्यनवकाशात् तादृशकारणताघटितप्रथमकल्पे व्याप्यविषयकत्वा
निवेशः अवच्छेदकत्वस्य पर्याप्त्यनिवेशात् विषयविशेषविषयत्वस्याऽधिकस्य परामर्शजन्यतावच्छेदकत्वेपि नासं
भवः समवायस्य पक्षदेशानतिरिक्ततया समवायस्यावच्छेदकत्वे तद्देशस्यापि तथात्वस्याव्याहतत्वात् अत
एवावच्छेदककोटिप्रविष्टवह्नित्वादिजातिमादाय वह्न्यादिरूपविषयविशेषेऽतिव्याप्तिवारणाय ज्ञानवृत्तिरिति ज्ञा
नसमवेतेत्यर्थः अथ वह्नित्वादिकमवच्छेदकविशेषणतयाऽवच्छेदकतायामेवावच्छेदकं न तु कार्यतायां त
थाच कथं तज्जातिमादायातिव्याप्तिप्रसक्तिः न च स्वावच्छिन्नविधेयताकत्वसंबंधेन कार्यविशेषणतया वह्नित्वमपि का
र्यतावच्छेदकमिति वाच्यं तादृशपरंपरायाः संबंधत्वे मानाभावात् विषयितासंबंधेन च वह्नित्वस्याऽतिप्रसक्ततया अ
वच्छेदकत्वायोगादिति चेन्न अवच्छेद्याश्रये साक्षात्परंपरया वा पर्यवसितविशेषणानि तावत्स्वेव कार्यतावच्छेदकत्वो
पगमे बाधकाभावात् कार्यतावच्छेदकादिविशेषणस्य कार्यतादौ तदवच्छेदकत्वेऽवच्छेदकत्वमित्यत्र विनिगमका
भावेपि न ज्ञानवृत्तिरित्यादिवैयर्थ्यं नच व्यधिकरणस्यानवच्छेदकत्वनियमात् विषयत्वेनैव कार्यतावच्छेदकत्वसं
भव वाच्यं साक्षादवच्छेद्याश्रयविशेषणतया विलक्षणावच्छेदकतायामेव सामानाधिकरण्यापेक्षणात् अवच्छेदकघ
टकानां भेदेपि अवच्छेद्यजन्यत्वादिज्ञाननिष्ठापितायाः स्वावच्छेदकतापर्याप्त्यधिकरणं यादृशं तादृशप्रकारकाव

गदा॰ च्छेद्याश्रयविषयताया अभेदादवच्छेद्यकार्यत्वादेरभेद इति वह्निविधेयकानुमितिः परामर्शजन्येत्याकारककार्यका-
35 रणभावग्रहेऽनुमितिविषयताया अपेक्षणात् कार्यकारणभावैक्येऽनुमितित्ववह्नित्वादीनामवच्छेदकतावैलक्षण्येन ताव-
त्समुदाये यद्यपि नैकमवच्छेदकत्वं तथापि तत्कार्यतानिरूपितावच्छेदकताधारतायाः समुदायवृत्तिधर्मेणैवावच्छे-
दादित्यलं पल्लवेन। ताहशजातिमज्ज्ञानत्वस्य लक्षणत्वे सामानाधिकरण्यसंबंधेन ताहशजातिवैशिष्ट्यस्य ज्ञानत्व इव वि-
षयवृत्तिधर्मेऽपि सत्त्वेन तद्व्यावर्तनाय ज्ञानत्वस्यापि अवश्यं निवेशनीयतया गौरवमिति तदुपेक्षितं ज्ञानत्वाव-
च्छिन्नसाध्यकादिपरामर्शजन्यताघटितं ज्ञानवृत्तिजातिमादाय लक्षणं तु स्फारं तत्र च विषयवृत्तिज्ञानत्वादिजाति-
मादाय अतिव्याप्तेर्दुर्वारत्वादिति ताहशपरामर्शजन्यताघटितमपि लक्षणं संभवतीति सूचयितुं ज्ञानवृत्तित्ववि-
शेषणं परित्यज्य कल्पान्तरमाह सामानाधिकरण्येन चेति। कार्यविशेषणतया विषयलक्षणमवच्छेदकत्वे इह सा- २५
मानाधिकरण्येनावच्छेदकत्वं अतो ज्ञानत्वादेः कार्यतासमानाधिकरणत्वेऽपि न क्षतिः। यत्तु आलोकादिलिंगका-
नुमितौ धूमादिलिंगकपरामर्शस्य व्यभिचारणाय स्वसमानाधिकरणानन्तरलिंगकपरामर्शाव्यवहितोत्तरत्वेन तल्लिं-
गकपरामर्शाव्यवहितोत्तरत्वं न तल्लिंगकपरामर्शजन्यतावच्छेदकमवश्यं वाच्यं तथा च परामर्शविशेषणतया ज्ञा-
नत्वस्य परामर्शजन्यतावच्छेदकत्वान्न दोष इति प्रसंगवारणाय सामानाधिकरण्येनेति कल्पानुसरणमिति तन्न असा-
धीयः अव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वेऽनुमितित्वनिवेशस्य निष्प्रयोजनकतयाऽसंगतत्वात् तदव्यवहितोत्तरत्व-
निवेशे क्वापि व्यभिचारः प्रसज्यते येन द्वारकतया अनुमितित्वनिवेशनं सार्थकीभवेत्। अथानुमितित्वाप्रवेशे धूम-
परामर्शाद्यव्यवहितोत्तरोत्पन्नतत्समानाधिकरणान्यघटसंयोगाद्वित्वाद्यधिकरणे घटादौ परामर्शाभावेन व्यभि-
चार इत्यनुमितित्वनिवेशसार्थक्यं अव्यवहितोत्तरत्वनिवेशे विषयविशेषावगाहितायाः प्रयोजनान्तराभावेन व्य

भिचार इत्यनुमितित्वनिवेशसार्थक्यं अव्यवहितोत्तरत्वनिवेशो विशेष्यविशेषावगाहितायाः प्रयोजनं तदभावेनानिवे
शात् नच कार्यनिरूपितदैशिकव्यापकत्वेन कारणताघटके अपि तत्कार्यतावच्छेदकव्यापकसामानाधिकरण्यप्रति
योगित्वं अतएव क्रियानधिकरणोत्तरदेशसंयोगोत्पन्नावधितस्मात् कारणत्वमिति वाच्यं प्रकृते कार्यनिरूपितदैशि
कव्यापकतायाः कारणताघटकत्वे कार्याधिकरणदेशत्वस्य कारणाधिकरणदेशत्वनियतत्वनिर्वाहो क्रियाधिकर
णोत्पद्यमानः संयोगो यद्यात् तदनधिकरणोत्तरदेशे जायते तथा परामर्शाधिकरण इति तदनधिकरणेपि सिद्ध्यभा(
वादिघटितानुमितिसामग्रीसत्त्वमनुमितेस्तथात्वादृष्टसपउर्वांतरत्वादिति चेत् सत्यं अनुमितित्वमनिवेश्य स्वसमानाधि
करणपरामर्शाव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे संयोगादिविशेषे व्यभिचारोऽस्त्येव तद्वारणाय स्वाव्यवहि
तपूर्ववर्तिपरामर्शसामानाधिकरण्यमेव विशेषणं तथा जन्यतावच्छेदकस्वरूपे यतो तथा च तद्विशिष्टाधिकरणं पराम
र्शाधिकरणमेवेति उपलक्षितस्य संयोगादेः परामर्शाव्यभिचारित्वेपि तद्विशिष्टाधिकरणताघटितव्यापकताग
र्भकारणत्वमक्षतमित्यनुमितित्वनिवेशनमफलं नच स्वत्वाननुगमेन तेनोक्तधर्मस्य कार्यतावच्छेदकत्वमपि त
अव्यवहितोत्तरत्वसामानाधिकरण्योभयसंबंधेन परामर्शविशेष एव तज्जन्यतावच्छेदकः तस्य चाऽनुमितिरूपका
र्यविशेषणतया न कारणताघटकत्वसंभवः परामर्शसमानकालीनविनश्यदवस्थपरामर्शजन्यानुमित्यधि
करणतायाः परामर्शविशिष्टनिरूपितत्वेन कारणत्वाघटनतया परामर्शस्य तादृशानुमित्यकारणत्वप्रसंगात्
परामर्शोपलक्षितस्य संयोगादेस्तदाशे व्यभिचारएवेत्यनुमितित्वनिवेशनमावश्यकमेवेति वाच्यं पक्षतावच्छिन्नसा
मानाधिकरण्यसंबंधेन परामर्शस्य विशेषणत्वं एवं विनश्यदवस्थपरामर्शजन्यानुमितेरसंग्रहात् अव्यवहितोत्तर
तावच्छिन्नसामानाधिकरण्यसंबंधेन परामर्शस्य तथात्वे च तादृशानुमितेरप्यधिकरणतया विशिष्टनिरूपितत्वे

गदा॰
36

ननतत्संग्रहात् नचैवंसतिपरामर्शोनविशेषणंताहृशानुमितौसमानकालीनस्यैवतथात्वादित्युपलक्षणपक्षो
क्तदोषोदुर्वारएवेतिवाच्यं एककालानवच्छिन्नेनापिसामानाधिकरण्येनपरामर्शविशिष्टनिरूपितायाःपरा-
मर्शाधिकरणत्वनियततायाः अधिकरणतायास्तदुपलक्षितनिरूपिताधिकरणतातोविलक्षणतयातस्याश्चाव
च्छेदकतयाव्यापकतावच्छेदकत्वेनव्यभिचारानवकाशात् परामर्शनाशक्षणेन्यत्रानुमित्यधिकरणतायामपि
ताहृशविशिष्टनिरूपितत्वासत्त्वेनतस्याःकारणतावच्छेदकत्वेनपरामर्शनियम्यत्वोपपत्तेः ज्ञानत्वादिकंनिवेश्य
पिसंयोगादौव्यभिचारावरणासंभवात् विनिगमनाविरहेणतस्यापिकार्यतावच्छेदकतायादुर्वारतयाःतिसंगा
च्चेनचाव्यवहितप्राक्क्षणावच्छिन्नतल्लिंगकपरामर्शाधिकरणविशिष्टसमवायेनतल्लिंगकपरामर्शजन्यतावच्छे-
दकसंबंधःएवंचप्रकृतमनुमितित्वमेवतज्जन्यतावच्छेदककोटौप्रवेशेनतद्वारकविशेषणोपादानानुपपत्ते तस्मात्
यत्साध्यपक्षकानुमितिरेकलिंगकपरामर्शजन्यैवप्रसिद्धातत्पक्षकतत्साध्यव्याप्यवत्तापरामर्शजन्यताघटि-
तमेवलक्षणमभिप्रेतंएवंतादृशपक्षमपितत्पक्षादिपदमेवतत्रचनपरामर्शविशेषणतयाज्ञानत्वजन्यतावच्छेद-
ककोटिप्रवेशप्रसक्तिरिति ननुविशिष्टवैशिष्ट्यबोधातिव्याप्तिवारणायनानापदार्थघटितपक्षतव्याप्यज्ञा-
नविषयतद्घटकपदार्थानांविषयकत्वनिवेशोप्यतिव्याप्तेर्दुर्वारतास्त्रवएवमितिश्चानुमितौनियमतोभासमा-
नव्याप्तिघटकसाध्यीयविषयकत्वानिवेशस्याःसंभवसंपादकत्वादसंभवइत्यतः ताहृशानुमितिविषयता-
याःप्रकृतसाध्यादिसाध्यादिसाधारणत्वात् सामान्यतोऽनुमितिविषयतायाःप्रकृतसाधकयावत्प्रमेयविशे-
ष्यकसमूहालंबनानुमितिविशेष्यकसमूहालंबनानुमितिविशेष्यतायाश्चकेवलान्वयित्वात् प्रकृतसा-
ध्यकेतियत्किंचिदितिचातिव्याप्त्यसंभवयोःवारकतामाविष्कर्तुंमेवोक्तिभंगेनाभिहितं निवेशस्तुताहृशा

परार्थस्यकस्यचिदेकस्यविशिष्यैवेत्यर्थः अनुभवत्वव्याप्यजातिघटितलक्षणोपरामर्शत्वावच्छिन्नकारणता
प्रतियोगिकव्याप्यविषयकवृत्तिकार्यताशालित्वेनानुगतेनकास्तिपद्यानुमितिव्यक्तीनांनिवेशनमयुक्तं नह्य
क्तीनांपक्षानुमितिव्यक्तिमुपादायानुभवत्वव्याप्यजात्यानह्यक्तिजातीयत्वस्यापिलक्ष्योर्लक्षणत्वसंभवादित्या
शयेनतादृशजातिघटितलक्षणतथैवनिष्पादयितियोग्यकोचिदितिअनुभवत्वमत्रनह्यक्तित्वावच्छिन्नप्रतियो
गिताकएवभेदोनिविष्टः नत्वनुभवत्वत्वावच्छिन्नप्रतियोगिताकः अनुभवत्वशरीरेसकलानुभवसमवेतत्वस्य
निविष्टत्वात् तदवच्छिन्नभेदनिवेशेनैवानुभवत्वज्ञानत्वादिसकलव्यापकजातिवारणसंभवेभेदप्रतियोगिता
वच्छेदकशरीरेअधिकानुभवेतरासमवेतस्यनिवेशनेचान्यत्वांतस्यज्ञानत्वादिसाधारण्यसंपाद्यतद्वारणाया
नुयोगित्वानुभवान्यासमवेतत्वरूपविशेषणांतरप्रवेशस्यप्रक्षालनाद्धीत्यादिन्यायविषयत्वात् नह्यक्तिस
मवेतप्रपत्त्यासमवेतधर्मसमवायित्वस्यलक्षणस्यसंभवेपिनक्षतिः अनुभवत्वव्याप्यनाघटितपूर्वलक्ष
णस्यैवेष्टानीनिष्पाणात् नह्यक्तिपदेनप्रत्यक्षादिव्यक्तिमुपादायअक्तशब्देनप्रत्यक्षादिलक्षणमपिसंभवतीत्या
शयेनप्रत्यक्षासमवेतत्वंनोपात्तमितिकोचितनत्र नह्यक्तिसमवेतयत्किंचिदनुभवासमवेतधर्मसमवायि
त्वैकशब्देनप्रमाचक्षुरूपलक्षणसंभवात् तथानभिधानबीजानुयोगस्यतावताडप्रवेहारात् धर्मसमवायि
त्वमिति समवायेनतद्वत्त्वमित्यर्थः यथाश्रुतेकालिकादिसंबंधेनतादृशानुमितित्वसमवायस्यातिव्याप्तेः
यासंबंधविशेषेणसमवायवज्ज्ञानिवेशस्यावश्यकत्वेसमवायस्यैवसंबंधतायाउचितत्वात् नन्वनुभवचक्षुरू
पसाधारणीजातिरप्रामाणिकीप्रत्यक्षत्वस्यैवविशेषणधीजन्यतावच्छेदकत्वसंभवादितिस्मृत्यन्यत्वविशिष्ट
स्यापिज्ञानत्वस्यज्ञानत्वानतिरिक्ततयाविशेषणांतरेणावारितत्वात् एवमनुभवान्यासमवेतेतिस्मरणान्यज्ञा

गदा॰

37

नान्यासमवेतार्थकं तत्र स्मरणाभिन्नेज्ञानत्वनिवेशनमनतिप्रयोजकं ज्ञानान्यसमवेतेच्छात्वादेः तद्व्यक्तिसमवेत-
त्वविशेषणेनैव वारणात् स्मरणान्यान्यत्वेन स्मरणस्योपादानमपि न हि घटद इत्यादिवक्यत्वेन घट इति कश्चित्तु वदती-
ति न्यायेनाक्रमित्यत आह स्य स्यानुभवत्वेति अनुभवत्वजात्यंगीकारमते अनुभवत्वान्यविशेषणमस्यानुभवत्व-
व्यावर्तनायाव श्यकत्वात् तदनंगीकारे तु स्वस्मृत्यलक्षणे चक्रवर्तिव्याख्यानमनुपपन्नमिति व्याप्तीति १
व्याप्तिज्ञानत्वावच्छिन्नेति धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नेत्यर्थः
विशिष्टपरामर्शत्वावच्छिन्नेति वह्निव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चय-
त्वावच्छिन्नेत्यर्थः धूमादिलिंगकवह्न्याद्यनुमितौ धूमो वह्निव्याप्य इत्याकारकव्याप्तिप्रकारकनिश्चयस्य
कारणविधया हेतुत्वेन जन्यतावच्छेदकं च धूमलिंगकवह्निविधेयकानुमितित्वं वह्निव्याप्यधूमवान्पर्वत इ-
त्यादिपरामर्शस्य च तद्व्यापारविधया तत्वे तज्जन्यतावच्छेदकं च पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नवि- २
धेयकधूमत्वावच्छिन्नलिंगकानुमितित्वं एवं च धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वाव-
च्छिन्नलिंगकानुमितित्वं एवं च धूमत्वावच्छिन्नलिंगकानुमितित्वं एवं च धूमत्वावच्छिन्नविशेष्यकव्या-
प्तिप्रकारकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिका च पर्वतो वह्निमानित्येतादृशानुमितिनिष्ठकार्य-
तातादृशकार्यत्वसमानाधिकरणानुभवत्वव्याप्यजातिश्चानुमितित्वजातिरेव तामादाय सकलानुमितौ
लक्षणसमन्वयः वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधवृत्ति तथाविधनिश्चयत्वा-
वच्छिन्नविशेषणतावच्छेदकप्रकारकज्ञानीयकारणताप्रतियोगिककार्यतामादायातिप्रसंगस्य वारणा-
यावच्छिन्नान्तं तत्र चाव वह्निव्याप्तिविशिष्टावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नतादृशकार्यताया धूमत्वा-

वच्छिन्नविशेष्यकवह्निव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नविशेष्यकवह्निव्याप्तिप्रकारकनिश्चयत्वावच्छिन्न-
विशेषणतावच्छेदकप्रकारकज्ञानीयकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नतादृशकार्यतामादायातिप्रसं-
गस्तत्तत्तादृशनिश्चयवृत्तित्वमपहाय यत्तादृशनिश्चयत्वावच्छिन्नत्वनिवेशने तादृशनिश्चयत्वान्यूनवृत्तित्वे
तदर्थः अन्यथा वह्निव्याप्यधूमवान्पर्वत इत्यादिविशेषणतावच्छेदकप्रकारकनिश्चयस्य वह्निव्याप्तिप्रकारता-
निरूपितधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन पर्वतत्वावच्छिन्नविशे-
ष्यतापन्नधूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वेन च विनिगमनाविरहादेतद्वा-
दिकं चेत्यादिन्यायेन तादृशनिश्चयहेतुताया अपि तथाविधनिश्चयत्वावच्छिन्नतया तन्निरूपितकारणतामादा-
यातिप्रसंगवारणासंभवात् तादृशनिश्चयत्वान्यूनवृत्तित्वनिवेशे च वह्निव्याप्यधूमवान्पर्वत इत्येतादृशविशेषणता-
वच्छेदकप्रकारकनिश्चयहेतुताया वह्निव्याप्यो धूम इत्येतादृशनिश्चयावृत्तित्वेन तादृशनिश्चयत्वन्यूनवृत्ति-
त्वेन तादृशनिश्चयत्वे न दोषः वह्निव्याप्यधूमवत्पर्वतवानित्येतादृशविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यताया
अपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नताया विशेषणतावच्छेदकप्रकारकनिश्चयत्वविध-
याकारणतात्प्रतियोगिकव्याप्तिविशिष्टधूमवैशिष्ट्यावगाहिबोधनिष्ठकार्यतासमानाधिकरणत्वात् उक्तातिप्रसंगवा-
रणासंभवेन तादृशकार्यतासामानाधिकरण्यमपहाय तदवच्छेदकावच्छिन्नत्वनिवेशने एवं च तादृशप्रकारका-
निश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकीभूतवह्निव्याप्यवच्छिन्नधूमविशेषणताकबुद्धित्वेन
वह्निव्याप्तिविशिष्टधूमप्रकारकपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वाऽवच्छिन्नकारणताप्रतियोगिका-
वह्निव्याप्यत्वविशिष्टधूमावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छिन्नतायाः कार्यतायाः अनवच्छिन्नत्वान्नाति

गदा.

38

प्रसंगः अथैवमपि व्याप्यत्वावच्छिन्नधूमविशेषणताकबुद्धित्वावच्छिन्नजन्यतावच्छेदकताघटकीभूतेन वह्निव्याप्य
त्वविशिष्टधूमत्वावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छिन्नजन्यताया अनवच्छिन्नत्वान्नोक्तातिप्रसंगवारणा
संभवः नचतदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकपदस्यावच्छेदकतापर्याप्त्यधिकरणपरत्वात् नावच्छेदकैक
देशज्ञानत्वावच्छिन्नत्वमादायातिप्रसंगइतिवाच्यं समुदायस्यएकदेशानतिरिक्तत्वात् समुदायस्यतथात्वेएक
देशस्यातथात्वमित्यस्यशपथमात्रत्वादितिचेन्न तदवच्छेदकतावत्त्वं विवक्षितं न्यूनाधिकपदार्थावच्छिन्नोक्तजन्य
तयोरवच्छेदकत्वेचनैकधर्मावच्छिन्नपर्याप्तिकोन्यूनाधिकवृत्तिभ्यां तावत्पदार्थावच्छिन्नोक्तजन्यतयोरवच्छेदका
त्वनिविष्टपदार्थानांन्यूनाधिकभावविरहेणएकेनैवसमुदायत्वेनतदुभयावच्छेदकतापर्याप्तिरवच्छिद्यते अ
तोनासंभवः अथधूमोवह्निव्याप्यइत्येतादृशव्याप्तिनिश्चयस्यधूमलिंगकवह्निविधेयकानुमितित्वमेवजन्यता
वच्छेदकमपेयतेनत्वतत्रपक्षविषयकत्वांतर्भावः तथासत्यनंतपक्षभेदेनतत्कारणताबाहुल्यप्रसंगात् वह्निव्या
प्यधूमवान्पर्वतइतिपरामर्शजन्यतावच्छेदककोटौचपर्वतविषयत्वांतर्भावश्चावश्यकः अन्यपक्षकानुमितौतद
हेतुत्वात्कथंतादृशजन्यतावच्छेदकयोरेकपदार्थावच्छिन्नपर्याप्तिकत्वं नचतदवच्छिन्नेत्यत्र तदवच्छेदकया
वत्पदार्थावच्छिन्नत्वमेवनिवेशनीयं नत्वेकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकत्वं धूमोवह्निव्याप्यइतिवि
शेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदककोटौधूमनिष्ठविशेषणतायानिवेशात् वह्निव्याप्यधू
मवान्पर्वतइतिविशेषणतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदककोटौचतन्निष्ठविशेषणतावच्छेदकता
याएवनिवेशात् नैतादृशजन्यतायास्तादृशजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमितिनातिप्रसंगः अनु
तेचपरामर्शजन्यतावच्छेदककोटौपक्षविषयकत्वस्याधिकस्यनिवेशेपितज्जन्यतायांव्याप्तिज्ञानजन्यतावच्छे

दककोटौपर्वतविशेष्यतायाअनिरूपितायामहानसीयविशेष्यतानिरूपितायावह्निविधेयतायाअपिवह्निविधे-
यतात्वेननिवेशात् वह्निव्याप्यधूमवान्पर्वतइत्येतादृशपरामर्शजन्यतावच्छेदककोटौचपर्वतनिष्ठविशेष्यतानि-
रूपितवह्निविधेयतायाएवनिवेशात्परामर्शजन्यतायाव्याप्तिनिश्चयजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वा-
विरहात् एवंव्याप्तिनिश्चयजन्यतावच्छेदककोटौतदव्यवहितोत्तरत्वमन्यलिंगकानुमितौव्यभिचारवारणायनि-
वेशनीयं नतुव्याप्यवत्ताज्ञानाव्यवहितोत्तरत्वंगौरवात् व्याप्यवत्तानिश्चयजन्यतावच्छेदककोटौचनतन्निवेशः त-
न्निवेशेधूमोवह्निव्याप्यइत्येतादृशज्ञानकालीनान्यलिंगकानुमितौव्यभिचारात् अपितुव्याप्यवत्तानिश्चयाव्यव-
हितोत्तरत्वमेव तथाचपरामर्शजन्यतायानव्याप्तिज्ञानजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमितिचेन्न कारण-
व्यापारनिरूपितफलनिष्ठजन्यतयोः प्राचीनमतेएकधर्मावच्छिन्नत्वनियमादन्यथापर्वतपक्षकधूमलिंगकवह्नि-
विधेयकानुमितित्वमेकंव्याप्तिज्ञानपरामर्शजन्यतावच्छेदकंवाच्यं तथाचजन्यतयोरेकधर्मावच्छिन्नपर्याप्ति-
निरूपकताकत्वमेवेतिनानुपपत्तिः एतादृशनियमस्याप्रामाणिकत्वात् अयमेवाशयःकेचिदित्यनेनसूचि-
तः धूमत्वावच्छिन्नधर्मिकव्याप्तिप्रकारकज्ञानीयकारणतायाअपिवह्निव्याप्यधूमवान्पर्वतइत्येतादृशनिश्च-
यवृत्तित्वात्तत्प्रतियोगिककार्यतायास्तादृशव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेद-
कावच्छिन्नत्वमादायातिप्रसंगवारणायविशिष्टपरामर्शवृत्तित्वमपहायतदवच्छिन्नत्वनिवेशः एतेनत-
व्यावृत्तिस्तुपूर्ववद्बोध्या अत्रव्याप्तिविषयकवृत्तित्वस्यनिवेशेनैवविशिष्टवैशिष्ट्यबोधादिवृत्तिकार्यतामादायाति-
प्रसंगवारणसंभवात् गुरुतरव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नत्व-
स्यनिवेशाद्गौरवमित्यरुचिः सोपिकेचिदित्यनेनसूचितः मिश्रव्याख्यानन्तुपक्षस्यानतिपरेत्वितियथाश्रुतव्या-

गदा॰ व्येयलक्षणोपलक्षितजन्यत्वं निवेशनस्यलोकनाम्नाद्याननुभावायाह पक्षधर्मतेत्येवेति प्रतिपाद्यकोटिनिविष्टत्वं सम

39 मर्थः तच्च पक्षतेत्यत्रान्वेति तथा च पक्षधर्मतेति पदं प्रतिपाद्यकोटिनिविष्टपक्षतेत्यर्थः विशेषणमिति पक्ष

धर्मताज्ञानान्वितजन्यतान्वयिनीत्यर्थः यद्वा पक्षधर्मतेत्यत्र पक्षधर्मतापदं स्वार्थप्रविष्टेत्यर्थः पक्षपदं न तद्धर्मि

मात्रपरं अपितु पक्षतानिविष्टपरमेवेति भावः विशेषणमिति ज्ञानपदार्थ इत्यादिः धर्मत्वरूपविषयविशेष

णत्वेन विषयताज्ञानान्वयिधर्मिरूपविषयांशे च तस्य न विशेषणत्वसंभवः परामर्शविषयस्य तद्विशेषणत्वा

संभवात् दंडादिविषयकस्य पुरुषादिज्ञानस्य पुरुषादौ दंडादिसत्त्वेपि दंडादिविशिष्टपुरुषाद्यविषयकत्वात् दंड

पुरुषादावित्यादिज्ञानस्य दंडादिविषयकत्वेपि न तद्विशिष्टविषयकत्वं विषयतावच्छेदकस्यैव विशेषणत्वादतः

पक्षतोपलक्षितधर्मिवृत्तिताविषयकमेव ज्ञानमित्येव प्रकृते विवक्षितं तथा सत्यपि पक्षताजन्यत्वसहिते

परामर्शजन्यत्वं लभ्यते विशेष्यीभूततदन्वयिनो विशेषणत्वात् ज्ञानविशेषणतायाः पक्षताया ज्ञानान्वित रा॰

जन्यपदार्थजन्यतायां स्वन्वयादित्याशयेन तथैव लक्षणार्थमाह तथा चेति अथाकरणयागवाक्यसंबंधीनीत्या

दौ गवादावारुणादेः प्रकारत्वेन यत्र तस्य विशेषणत्वसंभवेन गवाद्युद्देश्यतया प्रतीयमाने सोपक्रमणादौ आ

रुण्यादिसाध्यताप्रतिपत्तिः संभवति प्रकृते तस्य लेशतः पक्षताया ज्ञानांशे प्रकारत्वात् ज्ञानान्वयिनाजन्यत्वे

न कथमन्वयः न चारुणयेत्यत्र आरुण्यस्यापि गवि तस्यात्प्रकारः अभेदसंबंधेनारुण्यविशिष्टायाएव तत्र साक्षा

त्प्रकारत्वात् तथा च परत्यागवि प्रकारस्याप्यारुण्यादेर्यथा गवान्वयिनात्वतीयार्थसाध्यत्वेनान्वयस्तथा प्रकृते

पि ज्ञानविशेषणधर्मतायां प्रकारीभूतधर्मिणि प्रकारीभवंत्याः पक्षतायाः ज्ञाताक्यपि जन्यत्वेन्वयः संभवत्येवे

ति वाच्यं विशेषणविभक्तेरभेदार्थकतयारुणाभेदस्य आरुण्यपर्यवसितस्य साक्षाज्ज्ञो विशेषणत्वसंभवा

त्त्मेवम् लोहितोषा ऋत्विजः प्रचरंतीत्यादौ यथा लोहित्यस्य ऋत्विक्प्रचरणांशे परंपरया विशेषणस्या
पि तदन्वयिनाऽदृष्टसाधनत्वेनान्वयस्तथा प्रकृतेपि परंपरया ज्ञानविशेषणीभूतपक्षतायाः अपि जन्यतयाऽन्वये
बाधकाभावात् एवं विशेषणविभक्तेः साधुत्वार्थकतामते ऽरुणयेत्यादावारुण्यं गवि परंपरयैव प्रकार इति
साक्षात्प्रकारस्यैव तदन्वयिनान्वय इति नियमाभावात् अथ भवतु परंपरया स्वविशेष्येणान्वयिनापि स्वान्वयः
तथापि जन्यतायां ज्ञानान्वये उपलक्षणतया ज्ञानविषयांशे प्रकारीभूतायाः पक्षतायाः जन्यत्वान्वयो न संभव
ति उपलक्षणपुच्छलग्नस्य विशेषणत्वायोगात् लोहितोस्णीषा इत्यादौ लोहित्यविशेष्यीभूतोस्णीषादेरपि
ष्टसाधनतान्वयोपगमेन लोहित्यस्यारुणयेत्यादावारुण्यविशेष्यतद्धर्मिणोपि क्रयसाधनतान्वयोपगमे
नारुण्यस्य चोपलक्षणपुच्छलग्नत्वाभावेन सामंजस्यात् प्रकृते च परामर्शविषये ऽनुमितिजनकत्वबाधे
न तत्र तदन्वयायोगादुपलक्षणताया एव वाच्यत्वादिति चेन्न प्रकृतेपि जन्यपदस्य प्रयोज्यपरतया कार
णतावच्छेदकप्रविष्टविषयाणामपि अनुमितिप्रयोजकतया तेषामपि जन्यपदार्थान्वयः संभवत्येवेति
सामंजस्यात् परामर्शप्रयोज्यतायाः लक्षणाघटकत्वेपि परामर्शान्वयिप्रयोज्यताशरीरे जनकत्वादि
नाप्यन्यथासिद्धिः तदनिरूपकत्वस्य निवेशेनाप्यनुमितिजन्यप्रत्यक्षादावतिव्याप्तिवारणसंभवात् विषय
प्रयोजकतायाश्च लक्षणवाक्यजन्यबोधविषयत्वेपि तस्या लक्षणाघटकत्वेनाविवक्षा अतो लक्षणे न व्यर्थ
विशेषणतावच्छेदकज्ञानांशे पक्षताया आश्रयधर्मिवृत्तिताविषयकत्वस्य प्रकारतया भाने पक्षताया अपि धर्मिपारतं
त्र्येण स्वाश्रयधर्मिवृत्तिताविषयत्वस्य प्रकारतया भाने पक्षताया अपि धर्मिपारतंत्र्येण स्वाश्रयधर्मिवृत्तिताविष
यकत्वसंबंधेन तदंशेऽन्वयः स्वीक्रियते तथा च ज्ञानांशे परंपरासंबंधेन साक्षात्प्रकारीभवत्यां पक्षतायां जन्यता

गदा॰

40

त्वयोर्निराबाधएव॥ तएवदंडिनंपुरुषमानयेत्यादौअंतराभासमानेमत्वर्थप्रविष्टसंबंधेआनयनकर्मत्वाभावेपि।
दंडादावानयनकर्मत्वान्वयः दंडादावपिस्वसंबंधभेदसंबंधेनपारतंत्र्येणपुरुषादौसाक्षात्प्रकारत्वोपगमेनोपपादनी
यः यत्तुपक्षतायाः सहकृतत्वसंबंधेनज्ञानविशेषणत्वात्पक्षताजन्यत्वलाभइतितन्नसत् परंपरयाविशेषणस्य
परंपराघटकतत्तत्पदार्थघटितपरंपरासंबंधातिरिक्तसंबंधेनान्वयेआकांक्षाविरहात् अन्यथादंडिपुरुषइत्यादा
वेककालीनत्वादिसंबंधेनापिपुरुषादौपारतंत्र्येणदंडत्वाद्यन्वयापत्तेः अरुणयेत्यादौआरुण्यपदंधर्मपरंवारुण
पदार्थः तत्पदोत्तरतृतीयैववारुण्यस्यक्रयसाधनत्वंबोध्यतेनत्वविशिष्टान्वयबलात्तत्रतल्लाभइतिनमीमां
सकासिद्धांतः तदुक्तंतृतीययागुणस्यैवसाधनत्वंक्रयंप्रति विस्पष्टंगम्यतेतत्रद्रव्यद्वारैवसिध्यतीतिआरु।
ण्यक्रयसाधनत्वंसाधनतावच्छेदकतयाप्रयोजकत्वमेवधूमाद्वह्निमानित्यत्रधूमपदस्यसाध्यार्थपरतैवेतिम
तेयथाहेतुपंचम्याधूमस्यकारणतायाविषयतयाअवच्छेदकत्वरूपंवह्निज्ञानप्रयोजकत्वमेवप्रतिपाद्यते ८.
तथात्रापिहेतुतृतीययासाधनतावच्छेदकत्वप्रत्यायनसंभवात् आरुण्यस्यसाधनत्वेवसिध्यतिउपपद्यत।
इतिनदर्थः एवंचसतिगोःक्रयसाधनतायांश्रुतिसिद्धायांआरुण्यस्यावच्छेदकत्वेलाघवंतदाश्रयद्रव्यानव।
निष्टकारणत्वात्तदवच्छेदकत्वेगोरवमितिप्रतिसंधानाद्गोनिष्ठकारणतायामारुण्यावच्छिन्नत्वनिर्णयेआरु
ण्यविशिष्टगोःक्रयसाधनत्वमर्थात्प्रतीयते एताहृशबोधेऽरुणयेतिपदस्यतात्पर्यंनतुगुणिपरतयाआरु
ण्यपदस्यगुणिपरत्वोपदसमानलिंगतेतिकारिकाभिप्रायइतिकृतंपल्लवितेन तथाचेति पक्षतायाउपदर्शित
विशेषणत्वेचेत्यर्थः पक्षतासहकृतेतिपक्षताजन्यत्वेसतिपरामर्शजन्यत्वमर्थः परामर्शजन्यसाध्यव्याप्यहे
तुविशिष्टपक्षवैशिष्ट्यबोधेनाहृशापक्षताभावप्रत्यक्षादौचातिव्याप्तिवारणायपक्षताजन्यतोपादानेपरामर्श।

जन्यत्वमर्थः परामर्शजन्यसाध्यव्याप्यहेतुविशिष्टपक्षवैशिष्ट्यबोधेताहृशपक्षाभावप्रत्यक्षादौ चा
तिव्याप्तिवारणाय पक्षताजन्यतोपादाने परामर्शजन्यत्वोपादानस्य प्रयोजनमाह यथेच्छायाइति यथे
च्छायाः सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपायाः ननु ताहृशाभावस्य लौकिकप्रत्यक्षमेव न संभ
वति पक्षतावच्छिन्ने कात्मवृत्तित्वरूपातीन्द्रियलक्षणघटितधर्मावच्छिन्नप्रतियोगिताकत्वात् यदि च प
कात्मवृत्तित्वमेव वैशिष्ट्यं सिषाधयिषाकालीनसिद्धौ कालान्तरावच्छेदेन स्वसमानाधिकरणसिषाधयि
षाभावनिरूपितताहृशवैशिष्ट्यसत्वेपि तदानीं सिषाधयिषाविरहात्मकविशेषणाभावात्तो विशिष्टाभा-
वः लक्षणप्रवाऽन्यथापक्षतावच्छिन्नत्वनिवेशोपि याहृशसिद्धेर्द्वितीयक्षणे सिषाधयिषायाउत्पत्तिः तत्र
षोवा तत्र सिषाधयिषाभावनिरूपित ताहृशवैशिष्ट्यसत्वेन तस्याउत्पत्तिद्वितीयक्षणे न तत्क्षणे वा विशि-
ष्टाभावासत्वप्रसंगादिति मन्यते तथाप्यनुगतानुगतसिषाधयिषाभावसहस्रस्य ताहृशविशिष्टा
भावप्रतियोगितावच्छेदकत्वेन तस्य पृथग्ग्रहस्यैणापि ज्ञातुमशक्यतया न तल्लौकिकप्रत्यक्षसंभवः सि
षाधयिषायोग्यतयाऽनेकत्वमते स्वतन्त्रान्यथायोग्यतायाः तत्र लक्षणात्मकतया ऽयोग्यत्वादित्यत-
आह विशेष्याद्यभावरूपायावेति सिषाधयिषाभावाविशेषितसिद्ध्यभावरूपायाइत्यर्थः आदिना सि
षाधयिषाभावरूपविशेषणाभावपरिग्रहः यत्र विषयविशेषे सिद्धिकाले सिषाधयिषा बलात्कदापि ना
नुमितिः तत्र सैव पक्षतेति तयोः प्रत्यक्षस्य दुरुपपादत्वादिति भावः न च परामर्शानुपादानेपि स्थलवि-
शेषीयविशिष्टाभावरूपपक्षताजन्यघटितलक्षणं संभवतीति परामर्शोपादानमनर्थकमिति वाच्यं
स्थलेपात्र परामर्शजन्यत्वांशस्य सार्थकताय प्रत्यक्षविषयपक्षतायाएव निवेशयितुं शक्यत्वात् परा-

गदा॰ मर्शजन्यत्वं परामर्शनिष्ठजनकतानिरूपितजन्यत्वं तच्च परामर्शनिष्ठत्वस्थाने परामर्शत्वावच्छिन्नत्वं
तदुभयोरेकावच्छेदकावच्छिन्नत्वं च निवेशयति तत्त्वेनेत्यादिना तत्त्वेन परामर्शत्वेन पक्षताजन्यतायां
91 च न पक्षतात्वावच्छिन्नत्वविशेषणं प्रयोजनविरहात् तदुभयजन्यत्वं पक्षतापरामर्शोभयजन्यत्वं त॰
था च पक्षताजन्यतावच्छेदकावच्छिन्नाया परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वं॰
पर्यवसितं परामर्शत्वेन जनकताविवक्षायाः प्रयोजनमाह तेनेत्यादिना अन्यपरामर्शसत्त्वेनानु
मितिरेव भविष्यति न तु प्रत्यक्षं अनुमितिसामग्र्या भिन्नविषये बलवत्त्वात् ज्ञातायां चानुमितौ न त॰
त्प्रत्यक्षसंभवः तदानीं तदभावात् विषयस्य च कार्यकालवृत्तितया हेतुत्वाच्च तथा च कथमतिव्याप्ति
रित्याशंकापरिहारायाह बाधादिकालीनेनेति आदिपदात् साध्याभावव्याप्यवत्ताज्ञानप्रत्यक्षेच्छाविशि॰
ष्टप्रत्यक्षसामग्रीरूपानुमितिप्रतिबंधकान्तरपरिग्रहः तथा च तत्रानुमितिसामग्र्येव नास्तीति भावः प ८१
क्षताप्रत्यक्षे परामर्शजनकतासंपादकविशेषणमाह दैवात्प्रतियोगिविषयकेणेति दैवात् कदाचित्
त्वसामग्रीवशात् प्रतियोगिविषयकेण सिद्धिविषयकेण तथा च वह्निव्याप्यधूमवान् पर्वतः पर्वतविशे
ष्यकवह्निनिश्चय इत्येतत्समूहालंबनस्मरणोत्तरकालीन तादृशनिर्णयाभाववानहमित्यादिप्रत्यक्षे पक्ष॰
ताजन्यतायाः स्वावच्छेदकीभूततादृशासिद्ध्यभावप्रत्यक्षत्वावच्छिन्नायाः परामर्शनिष्ठसिद्धि ज्ञानत्वावच्छि
न्नजनकतानिरूपितजन्यताया असत्त्वात् प्रत्यक्षेति प्रसंगः उक्तसिद्धिज्ञानत्वावच्छिन्नजनकतायां परामर्
शत्वावच्छिन्नत्वविरहान्न संभवतीति समुदायार्थः एकावच्छिन्नत्वाविवक्षायाः फलमाह तदुभयसमू॰
हालंबने चेति पक्षतापरामर्शोभयसमूहालंबनप्रत्यक्षे चेत्यर्थः तादृशप्रत्यक्षे विषयविषयतादृशपर॰

तत्ताय तत्तापरामर्शयोः कारणत्वेपि पक्षताप्रत्यक्षत्वपरामर्शप्रत्यक्षत्वरूपभिन्नधर्मयोरेव तदुभयवृ-
त्तितावच्छेदकतया नातिव्याप्तिरिति भावः अथ परामर्शप्रत्यक्षेन परामर्शत्वेन विषयस्य हेतुताया अपि तत्सामा-
न्यतः प्रत्यक्षे विषयत्वेनेति प्रागेवोक्तं एवं च प्रकारावच्छिन्नत्वनिवेशनमफलं न च परामर्शप्रत्यक्षस्य वह्नि-
व्याप्यधूमवान् पर्वत इति जानामीत्याकारकस्य विशिष्टवैशिष्ट्यबोधतया विशेषणतावच्छेदकीभूतवह्निव्या-
प्यधूमप्रकारकपक्षनिश्चयत्वरूपपरामर्शत्वेन तत्र हेतुत्वमक्षतमेवेति वाच्यं विशिष्टवैशिष्ट्य-
बोधे विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वानभ्युपगमात् यत्तज्ज्ञानं व्याप्यत्वावच्छेदात्मभि-
न्नः सिद्ध्यभाववांश्चायमित्येतादृशलौकिकमानसेऽतिव्याप्तिवारणाय तदावश्यकं तत्र साध्यव्याप्यहेतु-
प्रत्यक्षनिश्चयत्वस्य प्रतियोगितावच्छेदकप्रकारकनिश्चयत्वात्मकतया मिश्रमते तथाविधभेदप्र-
त्यक्षजनकतावच्छेदकत्वादिति तत्र लौकिकमानसायोग्यवह्न्यादिव्याप्यवत् पक्षविषयकनिश्चयत्व-
रूपपरामर्शत्वावच्छिन्नकारणतायाः पक्षलक्षणे निवेशनीयतया ज्ञानं व्याप्यत्वावच्छेदात्मरूपप्रतियोगि-
ज्ञानमादायातिव्याप्त्यनवकाशात् तद्रूपस्य नभवत्वव्याप्यजातिमत्त्वस्यातद्रूपस्यैव विवक्षणीयतयाऽव्या-
प्त्यनवकाशाच्चेति मैवं परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतायाः स्वयं दूषितत्वेपि मिश्राभ्युपगततया तन्-
मतेन तमादाय स्वमते च उक्तविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुतामादायातिप्रसंगवारणाय उभ-
यजन्यतायामेकधर्मावच्छिन्नत्वनिवेशस्यावश्यकत्वात् अथैकधर्मावच्छिन्नत्वं यद्यवच्छेदककोटिप्रविष्टै-
कधर्मकत्वं तदा उक्तस्थले पक्षतापरामर्शजन्ययोः प्रत्यक्षत्वरूपैकधर्मावच्छिन्नत्वात् तद्दोषतादवस्थ्याय-
दि च एकधर्मावच्छिन्नपर्याप्त्यवच्छेदकताकत्वं तदाऽसंभवः तल्लिंगपरामर्शाव्यवहितोत्तरोत्पन्नानुमितित्व

गदा॰ स्यपरामर्शजन्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नत्वानिवेशेऽपि न निस्तारः पर्वतो वह्नि
52 मानित्यादिसिद्धिकाले नीलपर्वतो वह्निमानित्याद्यनुमित्युत्पत्त्या पर्वतत्वांशे उद्देश्यतावच्छेदकत्वपर्या
प्तेः परामर्शजन्यतावच्छेदककोटिप्रविष्टायाश्चाधिकायाः पक्षताजन्यतावच्छेदके निवेशात् मैवं पक्षता
जन्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नपरामर्शजन्यत्वैव निवेशनीया व्यभिचारवि
रहेऽपि पक्षतापरामर्शयोः सामान्यसामग्रीत्वविशेषसामग्रीत्वनिर्वाहाय पर्वतो वह्निव्याप्यधूमवानि
त्यादिपरामर्शजन्यतावच्छेदकगर्भपर्वतत्वाद्यंशोद्देश्यतावच्छेदकतापर्याप्तेरवश्यं निवेशनीयतयाऽ
क्तदोषासंभवात् अन्यथा पर्वतो वह्निव्याप्यधूमवान्नीलपर्वतो वह्निव्याप्यधूमवानित्यादिसमूहालंबनजन्य
तायाः पर्वतो वह्निमानित्यादिसिद्धिकालीनायाः नीलपर्वतो वह्निमानित्याद्यनुमितेः पर्वतो वह्निमानि
त्यादिसिद्ध्यभावजन्यतावच्छेदकानाक्रांततायाः तथाविधपरामर्शजन्यतावच्छेदकाक्रांततया अन्यलिं ५२
गकसिद्धपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनुमितेस्तादृशपरामर्शजन्यतावच्छेदकानाक्रांततयास्तथावि
धसिद्ध्यभावजन्यतावच्छेदकाक्रांततयानेन कार्यतावच्छेदकांशे व्याप्यव्यापकभावविरहेण सामान्यवि
शेषभावानुपपत्तेरन्यथा परामर्शजन्यतावच्छेदकेऽविषयनिवेशस्यापि निष्प्रयोजनकत्वापातात् य
दि चान्यलिंगकेच्छाकाले सिद्धिसत्वेऽनुमितिवारणाय सिद्ध्यनुत्तरत्वेन तज्जन्यतावच्छेदककोटौ निवेश्य
ते तदा परामर्शजन्यतावच्छेदककोटावपि तादृशसिद्ध्यनुत्तरत्वं निवेशनीयमन्यथा सामान्यविशेषभावा
नुपपत्त्या परस्परसहकारित्वासंभवादिति नानुपपत्तिरिति संक्षेपः पक्षतात्वपरामर्शत्वयोरननुगतसा
ध्यादिघटिततया व्यापकोपादानेऽन्यानुमितावव्याप्तिरित्यरुचेराह तद्वृत्तीति तादृशजन्यतावच्छेद

काश्रयवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षयेत्यर्थः नाव्याप्तिर्नयकोपादाने। त्वानुमितावव्या-
प्तिः चिंत्यमितिजन्यतायाश्चभावाविषयकत्वनिवेशेनैवसकलातिव्याप्तिवारणेऽग्रहतत्रपक्षताज-
न्यत्वनिवेशोगौरवमेवचिंताबीजंबोध्यं ॥ इत्यनुमितिलक्षणंसमाप्तम् ॥ श्रीगणेशायनमः
तत्करणमितीतितत्करणमनुमानमित्यत्रतत्पदेनपक्षविशेषणतापन्नहेतुविषयकत्वावच्छेदेन-
व्याप्तिकारकंयज्ज्ञानंतज्जन्यज्ञानंपरामर्शरूपंतेनतादृशज्ञानकरणत्वस्यानुमानलक्षणत्वंलभ्यते
तच्चनघटतेइतरभेदानुमापकस्यैवलक्षणत्वात्तादृशलक्षणेनइतरभेदानुमानेतद्घटकस्यव्याप्ति-
प्रकारकज्ञानत्वस्यैवानुमापकतासंभवेनइतरांशस्यवैयर्थ्येनतस्यानुमानेइतरभेदानुमापकत्वाऽ-
संभवात् यदिचप्रकृतहेतुतावच्छेदकघटकधर्मस्यानुमापकत्वावच्छेदकत्वसंभवेइतरांशस्यवै-
यर्थ्यंप्रकृतेचव्याप्तिज्ञानत्वस्यानुमापकत्वेव्याप्तिप्रकारकत्वविशिष्टावच्छिन्नज्ञानत्वमेवानुमाप-
कत्वावच्छेदकंतच्चप्रकृतहेतुतावच्छेदकीभूततादृशज्ञानकरणतात्वस्यनघटकंतच्छरीरेस्वरूप-
तोज्ञानत्वस्यनिवेशात्सामानाधिकरण्यरूपस्यव्याप्तिप्रकारकत्ववैशिष्ट्यस्यचानिवेशादितिमत्य-
तेनरूपिव्याप्तिज्ञानत्वावच्छिन्नस्यतादात्म्यसंबंधेनानुमापकत्वसंभवात्वैयर्थ्यंदुष्परिहमेवनच
व्याप्तिज्ञानत्वंसामानाधिकरण्यसंबंधेनव्याप्तिप्रकारकत्वावच्छिन्नज्ञानत्वंतच्चनोक्तलक्षणघट-
कंतच्छरीरेज्ञानत्वावच्छिन्नज्ञानएवव्याप्तिप्रकारकत्वस्यविशेषणत्वात् इतिकथंवैयर्थ्यंतेतिवाच्यं ।
उक्तलक्षणघटकयोरेकतरद्वयमितिरीत्याज्ञानविशेषणतापन्नव्याप्तिप्रकारकत्वज्ञानत्वयोरेवव्याप्त-
ज्यवृत्तिव्याप्यतावच्छेदकत्वसंभवेनवैयर्थ्यानुद्धारात् नचसाध्यादिभेदेनविभिन्नानांव्याप्तीनामनुग-

गदा॰ तद्रूपेणानिवेशाऽसंभवात् किंचिद्व्याप्तिप्रकारकज्ञानत्वमेव हेतुकार्यं तथा चानुमानमात्रस्य पक्षी
भूततत्वाद्भागासिद्धिरिति व्याप्तिज्ञानत्वादेर्नानुमापकत्वसंभवः यत्किंचिद्व्याप्तिप्रकारकयत्धर्मता
43 ज्ञानरूपानुभवत्वव्याप्यजातिमत् कारणत्वेन तु निखिलानुमानसाधारणमिति वाच्यं भागासिद्धिमात्र
वारकविशेषणस्यापि व्यभिचारवारकतया तदंतर्भावेण व्याप्यवच्छेदकत्वविरहाद्व्यर्थताप्रसङ्
गादित्याशंकां तेन चेत्यादिना वाच्यमित्यंतेन इतरभेदसाधनेऽनुमानत्वानुपपत्तेन तदितरभेदानुमानेना
केऽनुमापकं तथा चेतरांशस्य व्यर्थमिति भावः अधिकस्य व्याप्तिज्ञानभिन्नांशस्य वारणमात्रेति मा॰
त्रपदेन व्यभिचारवारणप्रयोजनकत्वव्यवच्छेदः फलोपहितस्यानुमितिफलोपहितकरणस्य लक्ष्य
तयाऽन्यत्र इतरभेदसाधने पक्षतया व्याप्तिज्ञानत्वादेरित्यादिना तादात्म्यसंबंधेन व्याप्तिज्ञानपरिग्रहः अति॰
प्रसक्तत्वात् पक्षानिर्दिष्टोऽनुमित्युपहितव्याप्तिज्ञानेपि वृत्तेः तथा च व्याप्तिज्ञानत्वादेरनुमितिफ
लोपहितकरणत्वानुपपत्तेन रभेदात्मकसाध्यव्यभिचारितया व्यभिचारकत्वेनेतरांशस्य सार्थक्यमिति
भावः स्वरूपयोग्यकरणमात्रस्य लक्षणत्वमभ्युपेत्य समाधत्ते करणत्वनिष्ठव्याप्तेरिति तादृशव्या॰
प्तिज्ञानत्वत्वावच्छिन्नत्वादित्यस्य व्यधिकरणत्वेनेत्यादि तथा च तन्निष्ठत्वसाध्यनिरूपितव्याप्ते
लघोरवच्छेदकत्वस्य संभवे तद्घटितगुरुधर्मस्यानवच्छेदकत्वे गौरवज्ञानस्यावच्छेदकताग्रहविरो
धित्वात् अन्यथोपपत्तौ तस्यावच्छेदकत्वे मानाभावाच्चेत्येव व्यर्थविशेषणतायां हेतुकताबीजं य
था वह्निमान्नीलधूमादित्यादौ प्रकृते च करणत्वनिष्ठेतरभेदव्याप्तौ व्याप्तिज्ञानत्वस्य व्यधिकरणत॰
याऽवच्छेदकत्वासंभवेन व्याप्तेश्चावच्छिन्नत्वनियमेनान्यथानुपपत्त्यारोपितादृशज्ञानकारणत्व

त्वस्यावच्छेदकत्वं वाच्यमिति तन्न व्यर्थविशेषणताद्दोषः उक्तं च यन्निष्ठाया निरूपिता व्याप्तिर्येन विशेषणेन-
विना गृहीतुं न शक्यते न तत् तस्सार्थकमिति अत एव वह्निमान् धूमात् प्रागभावादित्यादौ धर्मिभेदान्न वैयर्थ्य-
मिति भावः न च व्याप्तिज्ञाननिष्ठकारणत्वेन व्याप्तिज्ञानत्वावच्छिन्नेऽनुमिति नियतपूर्ववृत्तित्वफलानुपधाय-
कव्याप्तिज्ञानासंग्रहात् अपि तु नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव तादृशधर्मश्च व्याप्तिज्ञानत्वमे-
वेति तन्निष्ठव्याप्तेः कथं व्याप्तिज्ञानत्वत्वाद्यवच्छेद्यतासंभव इति वाच्यं स्वरूपसंबंध एव कारणत्वमित्यभि-
प्रायेणैव तल्लिखनात् वस्तुतो व्याप्तिज्ञानत्वत्वेन निखिलव्याप्तिज्ञानवृत्तिकारणतानिष्ठव्याप्यवच्छेद-
कं व्याप्यवच्छेदकं व्याप्तिज्ञानत्वस्य ज्ञाने विशेषणतापन्नव्याप्तिप्रकारकत्वज्ञानत्वोभयात्मकतया व्याप्ति-
प्रकारकत्वस्यापि कारणतात्मकत्वात् व्याप्तिज्ञानत्वस्य तद्वृत्तित्वात् ज्ञानत्वे सति व्याप्तिप्रकारकत्वत्वस्य
तादृशतादृशज्ञानत्वात्मककारणत्वावृत्तित्वात् नियतपूर्ववर्तितावच्छेदकत्वरूपकारणतात्वस्यो-
भयसाधारण्येन चोभयनिष्ठव्याप्यवच्छेदकत्वेनिष्प्रत्यूहमेव व्याप्तेः ध्यादिभेदेनाऽननुगततयापि व्या-
प्तिप्रकारकपक्षधर्मताज्ञानकारणत्वस्य निखिलव्याप्तिप्रकारकज्ञानीयकारणतात्वत्वेन सर्वसाधारणमेवे-
ति नानुपपत्तिलेशोऽपि धर्मिभेदेऽपि वैयर्थ्यमभ्युपेत्य समाधत्ते व्यतिरेकव्याप्तेरिति लक्षणस्य केवलव्य-
तिरेकिहेतौ तया व्यतिरेकव्याप्तिरेव प्रकृते गमकतौपयिकी तथा च साध्याभाववत्त्वावच्छेदेन हेत्वभाव-
व्याप्तेर्ग्राह्यतया हेतुतावच्छेदकस्य व्याप्यनवच्छेदकत्वेऽपि न क्षतिरिति भावः अथ प्रत्यक्षोपजीवकत्वादि-
ति यदुक्तं तन्न घटते ज्ञायमानधूमादेरनुमितिकारणतया तस्य प्रत्यक्षानुपजीवकत्वात् रूपादेरदृष्टद्वारा-
प्रवृत्तिजनकीभूतोपादानप्रत्यक्षोपजीवकत्वेऽपि नित्यहेतोस्तथात्वेनानुमानतावच्छेदेन तथात्वानुपप

गदा. नैः अनुमानसामान्यस्यैव निरूपणीयतयाऽनुमानत्वावच्छेदेनोपजीवकत्वसंगतावेव तद्ग्रंथतात्पर्यादित्या
54 शंकोद्धारपरतयात्तद्धेत्वादिमूलमवतारयति लिंगस्येत्यादिना स्वरूपतः अनुमितिकारणतावच्छेदेन अन्येन
अनुमानस्य प्रत्यक्षांतर्भावशंकापरिहारकतया तादृशग्रंथमवतारयंति तन्मते माह्यनुमितेरिति ज्ञानाकरण
ज्ञानत्वेनेति तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वेनेत्यर्थः यथाश्रुते विशेषणज्ञानकरणकविशिष्ट
वैशिष्ट्यबोधादौ अव्याप्तेः तस्यैव प्रत्यक्षलक्षणत्वादिति भावः प्रत्यक्षमिति मध्यनिवेशे प्रत्यक्षविशेषा
त्मकत्वे तत्करणस्यानुमितिकरणस्य प्रत्यक्षप्रमाणांतर्भावः स्यादिति प्रतीतिवैलक्षण्यस्यैव स्वतंत्रप्रमा
णनियामकत्वादिति भावः तत्तदनुमितेर्ज्ञानकरणकत्वे अत्रानुमितेर्ज्ञानकरणत्वेऽपि अनुमितेर्न प्रत्यक्ष
प्रमित्यंतर्भावः अनुमिनोमि न साक्षात्करोमीत्यनुव्यवसायबलात् अनुमितौ प्रत्यक्षत्वविरुद्धानुमितित्व
सिद्धेः उक्तलक्षणे च चाक्षुषवृत्तित्वादिके जातिविशेषणानुपगम्यानुमितेर्व्याप्तत्वेन संभवादित्यस्वरसः ५५
केचिदित्यनेन सूचितः परीक्षिते परमतं निराकृत्य व्यवस्थापयितुं अनुमित्यात्मकप्रमितेश्चार्वाकेणान
भ्युपगमात्करणत्वरूपानुमानत्वावच्छिन्ने तेषामप्रामाण्यसाधनं न संभवति अतोऽनुमानपदं अन्यथा व्या
चष्टे अनुमानमिति अभिमतमित्यस्य परैरित्यादिः धूमादिज्ञानं धूमादिज्ञानत्वावच्छिन्नं अनुमानम
नुमानपदार्थः तथा च धूमादिज्ञानत्वेनैव पक्ष इति नानुपपत्तिरिति भावः अनुमानपदाद्धूमज्ञानत्वादि
नाबोधे लक्षणयैवेत्यभिप्रेत्य अव्याख्येयपरतयापि संगमयति असदिति व्याप्तिः ज्ञानोपनीते विषयीकृ
ते अनुमानमेव वाऽनुमितिकरणत्वावच्छिन्नमेव वाऽनुमानपदार्थ इत्यनुषज्यते तन्मते अलीकपद
पदानोपस्थितिः ननु पारमार्थिके सदसत्त्वं बंधाभावेन तत्र पदप्रवृत्तिनिमित्तीभूतानुगताकारासंबंधानुगता

कायसंवेद्यानुगताकारस्यगोत्वादेरनद्यात्मकत्वेनप्रभावरूपतयाऽलीकत्वात् अतनोप्यनुमितिक
रणत्वावच्छिन्नस्यतन्मतेऽनुमानपदार्थत्वेतिबोध्यम् एवंचचार्वाकैरनुमितेरनभ्युपगमेपिअसत्वात्स्वीका
रेणतेषांमतेअनुमितिकरणत्वावच्छिन्ने अप्रामाण्यसाधनेनाश्रयासिद्धिरूपदोषइतिभावः ननुलिंगज्ञान
स्यपर्वतोवह्निमानित्याद्यनुमितिजनकत्वेलिंगदर्शनानंतरंवह्निप्राप्त्यर्थिनःपर्वतादिगमनप्रवृत्तिरुपप
त्तिः पर्वतादौवह्न्यादिनिश्चयंविनातद्गमनेवह्निप्राप्तिसाधनतावच्छेदकवह्निमद्देशगमनत्वनिश्चयायोगा
दित्याशंकांपरिहरतिमूलेलोकइति संभावनामात्रादितिअयथापिलिंगदर्शनस्यापिनसाध्यसमानसानिश्च
योपगमेतोऽप्यनुमानस्य प्रामाण्यमायाति तथापिसर्वत्रव्यभिचारसंशयसंभवेनव्याप्तिनिश्चयासंभवा
त्तविपरीतभानकोटिविरोधिविशेषदर्शनस्यतन्मतेऽसंभवेनसोपिनिश्चयस्तावत्रसंभवतीत्याशयेनसंभाव
नादेरः नचयत्रसंशयेकोटिद्वयोरेकोत्कृष्टताविपरीतकोटिशेषएवचोत्कर्षःततःप्रवृत्त्यादिव्यवहारणायतदभावा
प्रकारकत्वस्यतत्प्रकारकज्ञानकारणतायामवश्यंनिवेशनीयतयाकथंसंभावनातःप्रवृत्त्यादिकार्यनिर्वा
हः तत्कोटेरुत्कर्षोत्कर्षरहिततदभावप्रकारकासत्वस्यतत्कोसंभावनासाधारणस्यकारणतावच्छेदकत्वेगौ
रवमितिवाच्यं अगत्यागौरवस्याऽदोषत्वात् वस्तुतस्तुतन्मतेऽनुगतधर्मस्यालोकतयासर्वत्राव्यवहितपूर्वा
परीभावापन्नतत्तद्व्यक्तित्वेनहेतुमद्भावः अत्रचतदभावाप्रकारत्वनिविशेनात्प्रवेशेतितत्वेननसंभावनायाः
प्रमाणान्तरेणगृहीतग्राहित्वरूपसंवादेनप्रमितित्वमिति आतत्कारणस्यप्रमादिज्ञानस्यप्रमाणत्वंसेत्स्यतीत्यत
आहमूलेसंवादेनचेतिवक्ष्यमाणयुक्त्या प्रमाणान्तरगृहीतग्राहित्वरूपसंवादस्यतन्मतेसंभावनायामसत्वे
नसंवादेनप्रामाण्याभिमानादित्यसमंजसमतोव्याचष्टेदीधितौसंवादेनेति यद्यप्यत्रतन्मतेगौजीवमाहसंभार

ग॰ वितस्येति संभावितस्य संभावनाविषयस्यानुगताकारस्य वह्नित्वादेरध्यक्षेण प्रत्यक्षप्रमित्यानुल्लेखात् अवि
दी॰ षयीकारणादित्यर्थः अनुगताकारस्य प्रमित्याविषयतासंपादकं विशेषणमाह असत्त्वादिति वह्नित्वादेस्तद्व्याहृ
45 त्तिरूपतयालीकत्वं बोध्यं अध्यक्षस्यालीकाविषयत्वसंपादकं विशेषणमाह परमार्थसत्त्वलक्षणमात्रसा
क्षित्वेति परमार्थसत् पारमार्थिको यः स्वलक्षणः स्वतो व्यावृत्तो वह्न्यादिस्तन्मात्रविषयकेणेत्यर्थः वह्नित्वा
देरनुगताकारस्य पारमार्थिके वह्न्यादावसत्त्वेन तस्य कथमितरव्यावृत्तिः व्यावर्तकधर्मादर्शनादित्याशंकाप
रिहाराय स्वलक्षणेत्युक्तं तथा च न संभावनायाः प्रमित्यंतरविषयकत्वरूपसंवाद इति भावः न चाध्यक्षस्य सं
भावनाविषयानुगताकारविषयकत्वेपि अध्यक्षविषयवह्न्यादिविषयत्वेन संभावनायाः संवादित्वमक्षत
मिति वाच्यं सदसतोरेकज्ञानाविषयतया अनुगताकारविषयिण्या विशिष्टबुद्धेः पारमार्थिकवह्न्यादिविषय
कत्वासंभवात् अनुगताकारवह्नित्वादिसंबंध्यलीकवह्न्यादेरेव विशिष्टधीविषयत्वात् भ्रमस्य तन्मात्रविषय
कत्वेन तदुत्पादितस्य प्रमित्यंतरविषयकत्वरूपसंवादस्याभिमानो न संभवतीत्यत आह अध्यक्षमूलकेति संभा
वितस्येति नु यज्यते विकल्पोल्लिखितत्वात् अनादिवासनामूलकशशविषाणादिविकल्पव्यावर्तनायाध्यक्ष
मूलकेति संवादः संभावनाया इति शेषः तथा चाध्यक्षमूलकविकल्पोल्लिखितविषयत्वमेव संभावनानिष्ठसं
वादः स एव प्रामाण्याभिमानप्रयोजकतया मूलकृतोक्त इति भावः यो यो याथीनामित्यादिग्रंथेनानुमानाप्रा
माण्यहेतुकथनादिति नाप्रत्यक्षं प्रमाणमित्यनुमानोपमानशब्दानां त्रयाणामप्रामाण्योपसंहारो न घटते इ
त्याशंकापरिजिहीर्षुरनुमानाप्रामाण्ये साधकहेतोरेवोपमानशब्दयोरप्रामाण्यसंपादकहेतुपरतां दर्शयति
तन्मूलकसमयनिर्णयाधीनप्रवृत्तिकयोरिति तन्मूलो अनुमाननिर्णयाधीनो यः समयनिर्णयादिस्तदधीनप्रवृ

त्रिकयोस्तादृशसहकारिसमवधानाधीनप्रमारूपफलोपधायकयोरित्यर्थः आदिनातात्पर्यनिर्णयादिपरि
ग्रहः समयादिसंभावनातएव शाब्दादिप्रमाभविष्यतीत्याशंकापरिहाराय निश्चयेत्युक्तं नचैवमनुमानेनप्र(
माणमित्यनेनानुमानाप्रामाण्यमात्रस्य प्रक्रांततया त्रयाणामप्रामाण्यउपसंहारविरोध इति वाच्यं अनुमानमप्र
प्रमाणमिति वाक्यस्य त्रितयाप्रामाण्यपरतात्पर्यात् अप्रामाण्यसाधने प्रमाणसाधर्म्यस्य हेतुता नचघटते प्रमा
णेपि यत्किंचिद्रूपेण प्रमाणघटादिसाधर्म्यसत्वात् इत्याशंकोद्धाराय प्रमाणतावच्छेदकरूपशून्यत्वधर्मेण
साधर्म्यं विवक्षितं तेन तथाच प्रमाणताप्रयोजकरूपशून्यत्वमेव पर्यवसितो हेतुरित्यभिसंधायाह अप्रमाणेति अ
यंच प्रसाध्यकोटिको हेतुः नैयायिकमते व्याप्तिनिश्चयत्वरूपप्रमाणताप्रयोजकरूपस्यानुमाने सत्वात् अ
तएव सर्वंमणिकृत्वाप्यस्यैव हेतोः सिद्ध्यर्थं योग्यापादीनामित्यादिग्रंथेन सर्वत्र व्यभिचारसंशयसामग्रीस
त्वेऽभिधाय व्याप्तिनिश्चयस्यैव दुर्घटत्वेन व्यभिचारप्रकारकत्वे सति व्याप्तिप्रकारकज्ञानत्वरूपस्य व्याप्तिनि
श्चयत्वस्याप्रसिद्धिः सूचिता एवं चानुमानमप्रमाणं प्रमितिकरणतावच्छेदकरूपशून्यत्वादिति प्रथमतः
चार्वाकैः प्रयुज्यते तत्रच व्याप्तिनिश्चायकतादृशरूपस्यानुमाने सत्वाद्धेतुरयं अस्माकमसिद्ध इति नैयायि
कैरपि ज्ञातुंशक्या विनाशयोर्व्याप्तिज्ञानत्वव्यभिचारप्रकारकत्वासमानाधिकरणत्वावच्छिन्नोत्पत्त्यव्यवहितप्रा(
क्क्षणत्वव्यापकव्यभिचारप्रकारकज्ञानसामग्रीकज्ञानमात्रधर्मत्वादिति नेतदुद्भावनीयं तावताच निरुक्त(
निश्चयत्वग्रहप्रतिबंधात्तादृशनिश्चयत्वस्य प्रमाकरणतावच्छेदकत्वसंदेहाधीनासिद्धिसंदेहनिवृत्तिरि
ति ध्येयं दृष्टेत्यत्रातीतत्वमविवक्षितं तथाचज्ञायमानेत्यर्थः एतच्चज्ञायमानलिंगकरणतामतएवोपपद्य
तेऽतः समनाभिप्रायेण प्रयतिसाधर्म्यदर्शनस्यैवेति अभिहितमित्यत्र हेतुरित्यनंतरोक्तेतिपदोपस्थाप्यकृत(

ग॰ टी॰ वाक्यार्थः संभावनैवेति संभावनैव परकीयसंशयादिविषयकं भावनैव व्यवहारहेतुः अनुमानं न प्रमाणमिति श
ब्दप्रयोगप्रयोजकत्वादित्यर्थः तथाच परकीयसंदेहविपर्ययवत्त्वज्ञानस्य तन्निवृत्तिरूपेष्टसाधनताज्ञानसंपादक
46 तया तादृशशब्दप्रयोगप्रयोजकस्योपपादनायानुमानप्रामाण्यमिति भावः दृष्टमुपलक्षणं जलस्थलेऽवयव
प्रयोगेन मध्यस्थस्य स्वपरिगृहीतकोटिविषयकसंभावनासंपादकतयैव वादिविजय इति बोध्यं तेन हेतुज्ञाना
न्मध्यस्थस्यानुमितेरवश्यमभ्युपेयतयाऽनुमानप्रामाण्यं निर्वहतीति प्रागुक्तदूषणमपास्तं भवतीति ध्येयं अनु
मानमप्रमाणमिति वाक्यस्याप्रामाण्योपगमेऽप्रामाण्यस्य भ्रमजनकत्वरूपतयाऽनुमानेऽस्य प्रामाण्यघातः अ
प्रामाण्याभाववति अप्रामाण्यप्रकारकत्वरूपस्य तज्जन्यज्ञानभ्रमत्वस्य विशेष्यांशे प्रमाणत्वनिर्वाह्यत्वात् इ
ति मूलोक्तव्याघातमुद्धरति नत्वित्यादिना आपातत इति यावत् अप्रसिद्धिविषयकत्वस्य भ्रमत्वरूपत्वे तस्य व
स्यापितत्वादित्यर्थः तस्य भ्रमत्वरूपत्वेन तस्य प्रामाण्याद्विशेष्यकत्वं विना अनुपपत्तेरनुमानप्रामाण्यानापा
दकत्वादिति भावः निरूपयामः अभ्युपगच्छामः विषयबाधाधीनतयाविशेष्यतासंबंधेन विषयबाधव्याप्य ५८
तया संभाव्येन अप्रामाण्येन प्रमाकरणत्वव्यतिरेकमिति निरूपयामः इत्यनुषज्यते तथाच प्रमाकरणत्वा
तदभावयोरेव तृतीयपक्षो न संभवतीति अन्यतराभ्युपगम आवश्यकः न तु प्रमाकरणत्वभ्रमकरणत्वयो
रपीति तदुभयमेव नाभ्युपेयते शब्दस्याविशिष्टज्ञानाजनकत्वेपि पदार्थोपस्थितिद्वारा मानसविशिष्टज्ञान
प्रयोजकत्वात् परप्रतिपत्त्यर्थं शब्दप्रयोग उपपद्यते मानसं च ज्ञानं निश्चयासंभावनावेत्यन्यदेतत् इति भावः
स्वतः प्रामाण्यग्रहे तत्संशयानुपपत्तिरूपमूलोक्तबाधकमुद्धरति नचेत्यादिना अप्रामाण्यसंशयाभावसं
पादकहेतुत्वं नरत्वचर्कोनिर्विकल्पकाविशेषणमाह अनुगताकारेत्यादिना अनुगताकारसंस्पर्शिनिर्विक

ग० टी० 97

त्वादिविषयके प्रामाण्यसंपादकानुगताकारविषयकत्वरूपप्रामाण्यसहचरितधर्माभावः सूचितः प
रमार्थसत्त्वलक्षणसाक्षित्वसन्मात्रविषयके एतेन संशयविरोधिसन्मात्रविषयकत्वरूपप्रामाण्यव्या
व्यावर्तकदर्शनं सूचितं स्वयंवेदनेति स्वात्मकं यत्संवेदनं तेन संवेदितं प्रामाण्यं यत्र तत्रेत्यर्थः निर्विक
ल्पस्यांशे प्रामाण्यावगाहितायाः स्वतःप्रामाण्यमित्यादि पञ्चवनारार्थं प्रागेवाशङ्कितत्वेपि पुनरभि
धानं व्यर्थमित्यत आह तदुत्तरभाविनीति निर्विकल्पकाव्यवहितोत्तरभाविनीत्यर्थः तथा च निर्विकल्प
कस्य सविकल्पकादि साक्षिध्यात्मकदोषात् भ्रमात्मकः तादृशानुभव इति भावः एवं चाध्यस्तस्य स्व
तःप्रामाण्यवत् ॥

५७

गांदाधारी

अनुमितिलदनराँ